निबंध
108

10
208

1

www.umaragyanbhandar.com

निबंध 108  35/2

॥ णमोत्थु णं समणस्स भगवओ महावीरस्स ॥

श्री-

# शासन जय पताका

## "तिथिवृद्धिक्षय-विषयकव्यवस्थापत्रम्"

પર્વતિથિની ક્ષયવૃદ્ધિ બાબત પૂ. પા. આચાર્ય શ્રીસાગરાનંદ-સૂરીશ્વરજી તથા પૂ. આચાર્ય શ્રીવિજયરામચંદ્ર સૂરિજી વચ્ચે ચર્ચા થતાં પૂનાના ડૉ. પી. એલ. વૈદે જૈન શાસ્ત્રો અને પરંપરાથી વિરૂદ્ધ કરેલ લખાણના અસત્યપણાને અને તે વૈદેની અપ્રામાણિકતાને જણાવનારા–મહામહોપાધ્યાય શ્રી હરિહર-કૃપાલુ દ્વિવેદી, મહામહોપાધ્યાય શ્રી ચિન્નસ્વામી શાસ્ત્રી વિગેરે પ્રખર વિદ્વાનોના 'શાસ્ત્ર અને પરંપરા અનુસારી મન્તવ્યને જ સત્ય ઠરાવનારા' સંખ્યાબંધ —

## અભિપ્રાયો —

પ્રકાશક —

ઝવેરચંદ રામચંદ ઝવેરી, નવસારી.

[ સર્વ હક સ્વાધીન ]

(વીર. સં. ૨૪૭૩)   માર્ગશીર્ષ શકે ૧૮૬૮   (વિક્રમ સં. ૨૦[illegible])

पण्यं २ रूप्यकौ

Shree Sudharmaswami Gyanbhandar-Umara, Surat   www.umaragyanbhandar.com

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# शासन जय पताका

પ્રાપ્તિ સ્થાન—

શ્રી જૈનાનંદ પુસ્તકાલય, ગોપીપુરા, સુરત.

વીર સં. ૨૪૭૩. વિક્રમ સં. ૨૦૦૩. સન ૧૯૪૬.

માર્ગશીર્ષ શાકે ૧૮૬૮.

નકલ ૧૦૦૦.

કિંમત. ૨-૦-૦.

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# शुद्धिपत्रकम्.

| पृ. | पं. | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १२ | २७ | द्व्यदयस्पार्शित्वे | द्व्युदयस्पार्शित्वे |
| १५ | १५ | तद्वानासामुपधानो मन्त्र<br>"इतिष्टकासु लुक् च मतोः" | "तद्वानासामुपधानो मन्त्र<br>इतिष्टकासु लुक् च मतोः" |
| २९ | २ | " ते स्वाभिमतं | तच्च "स्वाभिमतं |

प्रिंटरः—रामचंद्र येसू शेडगे, निर्णयसागर प्रेस,
२६-२८ कोलभाट स्ट्रीट, मुंबई नं. २

पब्लिशरः—झवेरचंद रामचंद झवेरी, जैन दहेरासरपासे नवसारी.

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# प्राक्कथनम् ।

प्रायो न कोऽपि सत्प्रेक्षावानद्योत्प्रेक्षापथमवतरति यः प्रत्याचक्षीत प्रमाणप्रकरसिद्धं प्रतिप्राणिप्रसिद्धञ्च धर्मस्यैव निर्बाधमैहिकामुष्मिकश्रेयःप्रसवित्वम् । धर्मश्चातीन्द्रियतया नार्वाग्दृगध्यक्षसाक्षिकतामर्हतीतिकृत्वा आगमतदुपोद्बलितानुमानयोरेव स्वसाक्ष्यमुपक्षिपति ।

परमागमानां सूत्ररूपेणाचार्यप्रणीतानामौत्सर्गिकशब्दसंकोचोदञ्चद्विविधविचिकित्साव्याधिव्याधूयमानं तात्पर्यञ्चिकित्सामपेक्षते निदाननिरूपणपुरस्कृतेन मीमांसोपस्कृतेन निर्णयामृतेन, इतरथा धर्मतत्त्वमेव न प्रतिष्ठातुमर्हति, न तरामनुष्ठातुम्, न तमाञ्च श्रेय आधातुमिति जगदिदमनर्थगर्त्ते निपत्य वर्त्तेत ।

निर्णायकैस्तु विचिकित्सितपक्षयोर्न जातु मनागप्येकतरपक्षपातुकैः सूक्ष्मैक्षिकयोभयपक्षाशेषरहस्यविशेषगवेषणधुरीणधिषणैर्मीमांसोपयोगिन्यायनिचयपूर्णपरिचयचतुरस्रविचारणैर्भवितव्यम्, अन्यथा वैद्यापसदेन व्याधेरिव विचिकित्साया निस्तारानुपपत्तेः, प्रत्युत विस्तारापत्तेश्च, यथाऽस्माकं पर्वतिथिवृद्धिविषयकविचिकित्सायाः । इत्यालोच्य निरुक्तगुणकनिर्णायकान्वेषणप्रवणस्य मे निरन्तरनिगमागमतात्पर्यानुसन्धानरसिकाः काशिका एव विपश्चितश्चेतसि व्यभासन्त । तेषु च काशिकहिन्दुविश्वविद्यालयप्राच्यविभागधर्मविज्ञानविभागाध्यक्षा, धर्ममीमांसायामभिनवभट्टपादा, महामहोपाध्यायश्रीचिन्नस्वामिशास्त्रिण एव निर्णायकसमितेरध्यक्षत्वेन वृता, नीरक्षीरविवेकन्यायेन मीमांसामसृणसरण्या पं. श्रीतुलाकृष्णझाकृतनिर्णयसंवादि व्यवस्थापत्रमिदं सम्यगुपबृंहयामासुः परे धीरधौरेया अन्ये बहवो महामहोपाध्यायाः पण्डितराजप्रभृतयोऽनुमोदयामासुश्चेति तत्सर्वं सङ्कलय्य जीताचारपरम्परायाः शाश्वतिकत्वसिषाधयिषया मया प्रकाशयितुमायास्यते, आशास्यते च तत्त्वैकपक्षप्रणयिनो मत्प्रयत्नेन प्रसद्य स्वव्यवहारमव्याहतं विदधीरन्निति कृतमधिकेन ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# પ્રકાશકીય નિવેદન.

પર્વતિથિ ક્ષય-વૃદ્ધિ બાબત બે જૈનાચાર્યો-આ. સાગરાનંદસૂરિજી અને આ. રામચંદ્રસૂરિજી વચ્ચેની તકરાર બાબત અનેક મહાન્ પંડિ-તોના નિર્ણયો આ પુસ્તકમાં છે તેમાં જણાવે છે કે—

"આ. સાગરાનંદસૂરિજી જૈન આચાર્યોના જુના સિદ્ધાંતોને માને છે. તથા ધાર્મિકક્રિયાઓમાં જુના માર્ગથી તેઓ જરાપણ ફેરફાર કરવા માગતા નથી. જુના શાસ્ત્રોના પ્રમાણથી અને ચાલુ અવિચ્છિન્ન પ્રણાલિકાથી તેઓ પોતાના મતનું સમર્થન કરે છે. જ્યારે આ. રામચંદ્રસૂરિજી, જુનો સિદ્ધાંત સ્વીકારતા નથી અને પોતાની નવી પ્રણાલિકાનો સ્વીકાર કરવા માગે છે, તેમજ પ્રાચીન મતના ફેરકાર માટે તેઓ પોતાનીજ વિચારસરણીનો માત્ર આધાર લે છે."

સંવત ૧૯૯૨ થી તકરાર ઉભી થઇ તે હજી ચાલે છે. કેટલાક ભલા માણસોએ શાન્તિ સ્થાપવા વચ્ચે આવીને વૈદની નિમણુક કરી. વૈદે, આ. વિજયરામચંદ્રસૂરિજીના નવા મતનો પક્ષ લીધો. આ. સાગરાનંદસૂરિજીને તે જાણવામાં આવવાથી તેને અપ્રમાણ જાહેર કર્યો અને જૈન સમાજના ધાર્મિક લોકોએ વૈદના તે નિર્ણય સામે વાંધો ઉઠાવ્યો. તેઓએ વૈદ, નિર્ણય કરવા માટે લાયક રહેલ નથી, એમ જાણીને પણ સત્યતા માટે હિન્દુસ્થાનના જાણીતા સંસ્કૃત પંડિતોના અભિપ્રાયો માગ્યા.

પરિણામે બનારસ-મિથીલા-કલકત્તા-અલ્હાબાદ-જયપુર-મદ્રાસ અને બીજા સ્થાનોના મોટા પંડિતો અને મહામહોપાધ્યાયો, આ. રામચંદ્રસૂરિજીના નવામતથી એક સરખીરીતે વિરૂદ્ધ ગયા, વૈદને પક્ષપાતી ગણ્યા, અને આ. સાગરાનંદસૂરિજી જે પ્રચલિત પૂર્વ પ્રણાલિકાની લોકોને દોરવણી આપી રહ્યા છે તે જુની પ્રણાલિકાને સંપૂર્ણ અનુમોદન આપી રહ્યા છે. એ વિગેરે અતિ મહત્વની બાબતો આ પુસ્તક પૂરી પાડે છે, અને નવામતનો અંત લાવે છે.

વૈદના નિર્ણયનો સમર્થપંડિત તુલાકૃષ્ણ ઝા શર્માએ કરેલો વિરોધ અને મહામહોપાધ્યાય પંડિત ચિન્નસ્વામી શાસ્ત્રીનો છેવટનો નિર્ણય કે જેને જાણીતા સંખ્યાબંધ પ્રખર મહામહોપાધ્યાયો વિગેરેનો ટેકો છે, અને જે આ પુસ્તકમાં પ્રસિદ્ધ કરવામાં આવેલ છે. આ દરેક વસ્તુઓ મહાન્ દસ્તાવેજો છે. આ બાબતને સમજવા માટે વાચકોએ તે જુદા જુદા વાંચવા જોઇએ. કે જેથી હંસશક્તિ પ્રાપ્ત થવાના યોગે અવિચ્છિન્ન પરંપરારૂપ ક્ષીરમાં મલી ગયેલો નવો તિથિમત ક્ષીર નથી પણ નીર જ છે, એ સત્ય સહેલાઇથી સમજાશે. અને તેથી આ પુસ્તકરત્નને નવા તિથિમતના સદંતર અસ્વીકાર માટે છેલ્લામાં છેલ્લું અમોઘ સાધન માનવાનું સદ્ભાગ્ય પ્રાપ્ત થશે.

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# श्रीशासनजयपताका ।

## "तिथिवृद्धिक्षयविषयकव्यवस्थापत्रम्"

श्रीमद्भगवज्जिनसम्प्रदायानुवर्तिनोः जैनाचार्ययोर्विद्वत्प्रकाण्डयोः श्रीमदाचार्यसागरानन्दसूरिश्रीविजयरामचन्द्रसूरिमहोदययोः १९९२, १९९३ वैक्रमसंवत्सरत आरभ्य पर्वतिथीनां वृद्धिक्षयविषये मतभेदस्समजनि । उभावपि तावाचार्यवर्यौ "क्षये पूर्वा तिथिः कार्या, वृद्धौ कार्या तथोत्तरा" इति वाचकमुख्यजैनसम्प्रदायाचार्यश्रीमदुमास्वातिवचःप्रघोषत्वेन प्रसिद्धिं गतं पद्यार्धमवलम्ब्य तदर्थविषये विभिन्नाभिप्रायावभूताम् । तत्र तत्तदनुयायी जैनसङ्घः स्वस्वाचार्यमतानुसारेण तत्तत्पर्वतिथ्याराधनादिकं प्रावर्ततानुष्ठातुम् । तेनानुष्ठाने द्वैविध्यं जातम् । तद्वशाच्च जैनसङ्घेऽपि द्वैविध्यमुदभूत् । विशेषतः प्रसर्तुं च तदारब्धम् । तेन च जैनसङ्घस्य हानिं मन्वानास्तन्मतस्थास्तत्तदनुयायिन इतरेऽपि च तयोराचार्यवर्ययोरैकमत्यसम्पादने बहु प्रायतन्त । परं त उभयेऽप्याचार्याः स्वं स्वं मतमेव साधु शास्त्रानुगतं चेति मन्वाना यदा नैकमत्याय स्पृहयन्ति स्म तदा स्वं स्वं मतं विलिख्य दातुं प्रार्थितास्ते तथैवाकुर्वन् । तत् परीक्ष्य तत्र शास्त्रानुगतं निर्णयं दातुं राजनगरस्थजैनसङ्घप्रधानपुरुषेष्वन्यतमैर्मध्यस्थः कश्चिन्नियोजितः ।

स च प्रमाणोपन्यस्तशास्त्राणामप्रामाण्यसिद्धत्वमाभासत्वं च प्रलप्य स्वमनीषानुसारेण निर्णयं कञ्चन विधाय तं पुरतोऽस्थापयत् ।

निर्णयपत्रे च तस्मिन् क्वचन पूर्वापरविरोधः, क्वचित्सामाचारीविरोधः, कुत्रचिद्बाधितत्वं, अशास्त्रीयताबाहुल्यं चेत्यादयो बहवो दोषास्समदृश्यन्त । तेन च निर्णये तत्र सन्दिहानमनसो धर्मविप्लवभीरवो बहवस्तत्सम्प्रदायानुसारिणः कमपि

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

विषयं निश्चेतुं तदनुसारेण चानुष्ठातुमपारयिष्णवस्तत्र तथ्यातथ्यत्वनिर्णयायास्माकं पुरतस्समुपस्थिताः । वयं तन्निर्णयपत्रमामूलचूलं नैकशोऽवलोक्य, अनुशील्य च जैनागमान्, तत्सामाचारीं च, अनुसृत्य च पूर्वमीमांसापद्धतिं विचारपूर्वकमधोनिर्दिष्टया प्रणाल्या व्यवस्थापयामः-

तत्राऽऽदौ निर्णयपत्रस्वरूपं विचारयामः । विचार्यमाणे च तस्मिन् तत्र बहवो दोषा अधोनिर्दिष्टास्समुन्मिषन्ति । तथा हि—

"क्षये पूर्वा तिथिः कार्या, वृद्धौ कार्या तथोत्तरा" इत्युमास्वातिवचःप्रघोषत्वेन जैनसङ्घे प्रसिद्धिं गतं श्लोकार्धमिदं चतुर्वर्गचिन्तामणौ (हेमाद्रौ) शिवरहस्यसौरपुराणवचनत्वेनोद्धृतम् । तत्रैवं पठ्यते-"क्षये पूर्वा तु कर्तव्या, वृद्धौ कार्या तथोत्तरा । तिथेस्तस्यास्तत्क्षणायाः, क्षयवृद्धी न कारणम्" ॥ १ ॥ इति । अर्वाचीना अपि निबन्धारो विष्णुभट्टप्रभृतयस्तथैव तदुद्धरन्ति । उमास्वातिभिरपि प्रघोषितम् । अन्यैरपि जैनाचार्यैस्तथैवोररीकृतम् । अतश्च सर्वसम्प्रदायसिद्धप्रामाण्यं वचनमिदमतिनिर्विवादं सिद्धे यन्मध्यस्थेन-"तदर्थमेव च प्रायो वाचकमुख्यैराचार्योमास्वातिभिः सकलजैनशाखोपशाखाभिमतग्रन्थरचनाधुरीणैः "क्षये पूर्वा तिथिः कार्या, वृद्धौ कार्या तथोत्तरा" इत्येवं प्रकारकं शास्त्रं संग्रथितमिति नो मतिः" इति वचनस्यास्य आचार्यश्रीमदुमास्वातिरचितत्वं स्वमनीषाबलेन कथितं तन्न केवलं निष्प्रमाणकं, बाधितमपीति वयमाशास्महे ।

इदानीं कोऽर्थो वचनस्यास्येति विमृशामः—तत्र मध्यस्थेन निर्णयपत्रस्य षोडशपृष्ठे-"उभयेऽप्याचार्या आराधनार्थमौदयिकीमेव तिथिमभ्युपगच्छन्ति शास्त्रप्रामाण्यात् । तच्च शास्त्रमेवंविधं श्राद्धविधिप्रकरणस्थम्-"तिथिश्च प्रातः प्रत्याख्यानवेलायां या स्यात् सा प्रमाणम्" । इति, प्रत्याख्यानवेला च सूर्योदयसमयः । एतादृशी सूर्योदयस्पर्शिन्येव तिथिरौदयिकीत्यु-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

च्यते । सैव सर्वेणापि श्रीजैनसङ्घेनाराधनार्थमपेक्ष्यते । अथ लौकिकटिप्पणे यदा काचित्तिथिः क्षीणेति निर्दिश्यते तदा तस्यास्सूर्योदयस्पर्शित्वमेव नास्ति । तदभावाच्चौदयिकीत्वासम्भवः । न च क्षीणातिथिगतमाराधनं क्षीयते । कथं नाम तादृशी क्षीणा तिथिरौदयिकी स्यादिति विचार्यमाणे मीमांसकप्रणालिकामनुसृत्य "विधिरत्यन्तमप्राप्ते" इत्यपूर्वविधिविधायकेन "क्षये पूर्वा तिथिः कार्या" शास्त्रेण क्षीणा अष्टम्यादितिथिः पूर्वस्यां सप्तम्यादौ विधीयते । अन्यथा औदयिकतिथेरसम्भवादाराधनाविनाशदोषः श्राद्धं संस्पृशेदिति । तत्रानेनापूर्वविधिविधायकेन शास्त्रेण सप्तम्यास्सप्तमीत्वं केवलमष्टम्याराधनानिमित्तमेव निराकृत्याष्टमीत्वं स्थाप्यते । एवञ्च लौकिकटिप्पणप्राप्ता औदयिकी सप्तमी अष्टम्याराधनाविषये औदयिक्येवाष्टमी भवति । तदैव तत्राष्टमीगतं तपआदिकमनुष्ठानं सम्भवतीति अपूर्वविधिद्वारैव क्षये सत्यष्टमीप्राप्तिः" इत्यादि ब्रुवता विचारोऽयं मीमांसकप्रणालिकामनुसृत्य क्रियत इति पूर्वस्यां सप्तम्यादावुत्तराष्टम्यादिः क्षीणा तिथिर्विधीयत इत्यभिप्रेयते । सर्वथा तदसङ्गतं मीमांसाप्रणालीविरुद्धं च । न ह्येकस्यां तिथावपरा तिथिर्विधातुं शक्यते । न ह्येकस्मिन् धर्मिणि धर्म्यन्तरविधानं सम्भवति । न वा सप्तमी विधिशतेनाप्यष्टमीकर्तुं शक्यते । न ह्यागमास्सहसा घटं पटयितुमीशते इति न्यायात् । अतस्सप्तम्यामष्टमीविधानं सर्वथा बाधितमेव । अथैवमुच्येत—न सप्तम्यामष्टमी विधीयते, किन्तु सप्तमीत्वमपहायाष्टमीत्वं विधीयत इत्येव वाक्यतात्पर्यमिति । तदपि न सङ्गच्छते । अष्टम्यादिशब्दा हि तिथिपराः । तिथिर्नाम अमासंज्ञकचन्द्रकलाव्यतिरिक्तचन्द्रकलानां मध्ये एकैकस्याः कलायास्सूर्यमण्डलेनाद्यावयवविप्रकर्षादारभ्यान्त्यावयवविप्रकर्षः, आद्यावयवसन्निकर्षादारभ्यान्त्यावयवसन्निकर्षो वा यावता कालेन सम्भवति तावान् कालः ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अमाषोडशभागेन, देवि! प्रोक्ता महाकला।
संस्थिता परमा माया, देहिनां देहधारिणी ॥ १ ॥
अमादिपौर्णमास्यन्ता, या एव शशिनः कलाः।
तिथयस्तास्समाख्याताष्षोडशैव वरानने! ॥ २ ॥

इति स्कन्दपुराणवचनात्,

"तन्यन्ते कलया यस्मात्, तस्मात्तास्तिथयस्स्मृताः।" इति सिद्धान्तशिरोमणिवचनात्, "यस्सूर्याचन्द्रमसोः परमो विप्रकर्षस्सा पौर्णमासी, यः परमस्सन्निकर्षः साऽमावास्या," इति गोभिलगृह्यवचनाच्च। अतश्च सूर्येण सहातिसन्निकृष्टस्य चन्द्रस्य यावता कालेन सूर्यात् द्वादशभिरंशैर्विप्रकर्षो भवति तावान् कालश्शुक्लपक्षे प्रतिपच्छब्दवाच्यः। एवं द्वितीयादिपूर्णिमान्ताः। एवं सूर्यादतिविप्रकृष्टस्य चन्द्रस्य यावता कालेन द्वादशभिरंशैस्सन्निकर्षो भवति तावान् कालः कृष्णपक्षे प्रतिपत्तिथिः। एवं क्रमेणामावास्यान्ताः। पौर्णमास्यां विप्रकर्षतारतम्यविश्रान्तिः। अमावास्यायां सन्निकर्षतारतम्यविश्रान्तिः। अत एव तिथिशब्दः प्रतिपदादिशब्दाश्च चन्द्रकलास्वेव शक्ताः। काले तु निरूढलक्षणया प्रयुज्यन्त इति स्थितिः।

एवं च सप्तमी नाम संख्याविशेषविशिष्टा चान्द्रमसी कला। तदवच्छिन्नः कालो वा। तत्र विशिष्टे प्रवर्तमानो विधिः विशेष्यभूतायाः कलायास्सर्वत्राऽविशेषात् "लोहितोष्णीषा ऋत्विजः प्रचरन्ति" इतिवत् विशेषणीभूते संख्याविशेषे पर्यवस्यति। तथाहि–श्येनयागप्रकरणे श्रूयते–"लोहितोष्णीषा लोहितवसना निवीतिन ऋत्विजः प्रचरन्ति" इति। उष्णीषं शिरोवेष्टनवस्त्रम्। प्रचरणं कर्मानुष्ठानम्। श्येनयागानुष्ठानकाले कर्मकरा ऋत्विजः रक्तवर्णमुष्णीषं वस्त्रं च परिधाय कर्म कुर्युरिति तदर्थः। तत्र ऋत्विजो न विधातव्याः। तेषां "ऋत्विजो वृणीते, वृता यजन्ति," इति प्रकृतिदृष्टवाक्याभ्यां विधानात् "प्रकृति-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वद्भिकृतिः कर्तव्या" इति अतिदेशशास्त्रेणातिदिष्टत्वात्। नापि कर्मकालिकमुष्णीषधारणम्। तस्यापि तत एव प्राप्तत्वात्। किन्तु विशेषणीभूतं उष्णीषगतं लौहित्यं परमप्राप्तत्वाद्विधीयते। अतश्च विशिष्टविषयोऽपि विधिः प्राप्ताप्राप्तविवेकन्यायेन लौहित्यमात्रे पर्यवस्यतीति निर्णीतं पूर्वमीमांसायाम्। तद्वदेवात्रापि वक्तव्यम्। एवं च कलागता या सप्तमीसंख्या सा सप्तमीसंख्या न भवति, किन्तु अष्टमी सेति विधिरवबोधयतीत्यभ्युपगन्तव्यम्। कथं तत् सङ्गच्छताम्? प्रत्यक्षतो ज्योतिश्शास्त्रतो वाऽवगम्यमानस्य वस्तुनः केवलं विधिना प्रलपितुमन्यथयितुं वाऽशक्यत्वात्।

एवं च यन्मध्यस्थेन निर्णयपत्रे षोडशपृष्ठ उक्तम्—"क्षीणाष्टम्यादितिथिः पूर्वस्यां सप्तम्यादौ विधीयत इति," एवं द्वाविंशतिपृष्ठे निगमनं निर्णयश्चेति शीर्षकस्याधस्तात्—"तिथिक्षये तु तादृशतिथेरत्यन्तमप्राप्तौ अपूर्वविधिविधायकेन "क्षये पूर्वा तिथिः कार्या" इति शास्त्रेण क्षीणायास्तिथेः पूर्वस्यां स्थापनं क्रियते" इति च, तदसङ्गतम्। मीमांसाप्रणालीविरुद्धं च। न हि मीमांसासरणौ कुत्रापि दृष्टोऽयं राद्धान्तो यदेकस्यां तिथौ तिथ्यन्तरं विधीयते स्थाप्यते वा विधिना। अतस्सप्तम्यामष्टमीत्वं स्थाप्यत इत्यप्यसङ्गतमेव।

किञ्च किमिदमुच्यते—तत्र तत्र मध्यस्थेन 'अपूर्वविधिविधायकेने'ति। "क्षये पूर्वा" इति वचनं अष्टम्यादितिथिविधायकं वा अपूर्वविधेर्विधायकं वेति मध्यस्थं प्रष्टुमभिलषामो वयम्, उभयमपि। अत एव मयोभयमप्युच्यते—अष्टम्यादितिथिर्विधीयत इति, 'अपूर्वविधिविधायकेन' इति च, इति स यदि प्रत्युत्तरयेत् तर्हि तं प्रतीदमेव वक्तुं प्रभवामो वयम्-अहो महत् कौशलं प्रकटितम्। अहो मीमांसाशास्त्रस्य परस्मिन् पारे प्रतिष्ठित आत्मा। अहो वाक्यार्थवर्णनचातुरी विद्वन्मनोरञ्जनीति। यतो नवीनोऽयं पन्था अनेनैवाविष्कृतो यत्परस्परमसम्बद्धमर्थ-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

द्वयं सकृच्छ्रुतेनैकेन विधिना विधीयत इति । यदि अप्राप्तायास्तिथेरेव विधायकं वचनमिति तदाशय उपवर्ण्येत तर्हि अपूर्वविधिविधायकेनेति किमुच्यते? न ह्यपूर्वविधेर्विधायकं किञ्चिदपेक्ष्यते । न वा "क्षये पूर्वा" इत्यपूर्वविधेर्विधायकम् । अष्टम्यादेर्विधिरपि न भवितुमर्हतीति पूर्वमेव निरूपितम् । एवमुत्तरत्राऽपि तस्मिन्नेव पृष्ठे-"एवं भाद्रपदशुक्लचतुर्थ्याः क्षये सांवत्सरिकं प्रतिक्रमणं पूर्ववर्तिन्यां तृतीयायां चतुर्थीं स्थापयित्वाऽऽराधनीय"मिति यदुक्तं तदप्यनेन न्यायेनासङ्गतमेव। किञ्च-क्वचित् 'पूर्वस्यां सप्तम्यादौ अष्टम्यादितिथिर्विधीयते' इति, कुत्रचित् सप्तमीत्वं निराकृत्याष्टमीत्वं स्थाप्यत, इति, कुत्रचित् 'क्षीणतिथिविषयकमाराधनं पूर्वस्यां तिथौ कार्यमित्यर्थः' इति चैकस्याऽस्य वचनस्य परस्परविरुद्धाननेकानर्थान् ब्रुवन् कमप्यर्थं निश्चेतुमपारयन् मध्यस्थः स्वीयमसामर्थ्यमेव भङ्ग्यन्तरेण प्रकटयति । तथाहि-सप्तम्यादावष्टम्यादिर्विधीयत इत्यत्र सप्तम्यादेरुद्देश्यत्वं अष्टम्यादेर्विधेयत्वं च प्रतीयते । यथा तप्ते पयसि दध्यानयति, इत्यत्र तापविशिष्टं पय उद्दिश्य दधिप्रक्षेपो विधीयते तद्वत् । द्वितीयपक्षे-सप्तमीत्वं सप्तमीतोऽपास्य अष्टमीत्वरूपो धर्मो विधिविषयीक्रियते इति गम्यते । तृतीयपक्षे-सप्तम्यधिकरणाराधनानिष्ठकर्तव्यता विधिविषयतामापाद्यते इति प्रतिभाति । एवं परस्परविरुद्धाननेकानर्थान् ब्रुवन्नुद्देश्यविधेयभावानपि भिन्नभिन्ननिष्ठतया कथयन् अर्थत्रयस्याप्येकरूपतामभ्युपगच्छन् मध्यस्थः कथमाप्तकोटावुपादेयकोटौ वाऽन्तर्गमनीयो भवेत्, इति सुधिय एव पर्यालोचयन्तु ।

अतश्च "क्षये पूर्वा तिथिः कार्या" इत्यत्रोद्देश्यविधेयभावकथनं तस्यापूर्वविधिविधायकत्वोक्तिः सप्तम्यामष्टमीत्वस्थापनं चेत्यादिकं मध्यस्थस्य भ्रमप्रमादादिमूलकमेव ।

अतोऽस्य वचनस्यैवमर्थो वर्णनीयः, यद्यपि वैदिकसम्प्रदाये तत्तद्विध्यनुसारेण कासाञ्चित् तिथीनामौदयिकीत्वम्, कासाञ्चि-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

न्मध्याह्नव्याप्तिः, कासाञ्चिदापराह्णिकीत्वम्, कासाञ्चित् कर्मकालव्यापिता इति च तेषु तेषु कर्मसु तिथिसम्बन्धोऽङ्गीक्रियते तथापि जैनसम्प्रदाये "तिथिश्च प्रातः प्रत्याख्यानवेलायां या स्यात् सा प्रमाणम्, सूर्योदयानुसारेणैव लोकेऽपि दिवसादिव्यवहारात्," 'चाउम्मासिय वरिसे, पक्खिय पंचऽट्ठमीसु नायव्वा। ताओ तिहिओ जासिं, उदेइ सूरो न अण्णाओ ॥ १ ॥ पूआ पच्चक्खाणं पडिकमणं तहय नियमगहणं च। जाए उदेइ सूरो तीइ तिहिए उ कायव्वं ॥ २ ॥ उदयंमि जा तिही सा पमाणमिअरीइ कीरमाणीए। आणाभंगऽणवत्था मिच्छत्त विराहणं पावे" ॥ ३ ॥ इत्यादिप्रमाणजातैः, "आदित्योदयवेलायां, या स्तोकाऽपि तिथिर्भवेत्। सा सम्पूर्णेति मन्तव्या, प्रभूता नोदयं विना ॥ १ ॥ उदयन्नेव सविता, यां तिथिं प्रतिपद्यते। सा तिथिस्सकला ज्ञेया, दानाध्ययनकर्मसु ॥ २ ॥ (स्नानदानजपादिषु) इत्यादिवचनसंवादिभिः औदयिकी तिथिरेव सर्वकार्योपयोगिनीति स्वीक्रियते। लौकिकटिप्पणे तिथीनां कदाचित्क्षयो लिख्यते, कदाचिद्वृद्धिश्च। तत्र क्षयो नाम सूर्योदयास्पर्शित्वम् अर्थात् प्रथमदिने सूर्योदयानन्तरमेव प्रवृत्तिः। द्वितीयदिनीयसूर्योदयात्पूर्वमेव समाप्तिः। एवं चाराधनाङ्गत्वेन विहितायाः कस्याश्चित् पर्वतिथेः लौकिकटिप्पणे तादृशे क्षये लिखिते तस्या औदयिकीत्वाभावेन कथङ्कारं तत्राराधना क्रियतामिति विचारे समुत्पन्ने वचनमिदं प्रवर्तते– 'क्षये पूर्वा तिथिः कार्ये'ति। कस्याश्चित् पर्वतिथेः टिप्पणे क्षये दृष्टे सति सा पूर्वा तिथिः कार्या इति वचनव्यक्तिरङ्गीकार्या। अत्र तिथिरित्युद्देश्यसमर्पकम्। पूर्वेति पदं विधेयसमर्पकम्। तिथिरिति सामान्यश्रुतमपि तिथिपदं प्रकरणात् पर्वतिथिपरम्। न च तिथिषु पर्वापर्वविभाग एव नास्तीति भ्रमितव्यम्। प्रवचनसारोद्धारादौ–"चतुर्दश्यष्टम्यमावास्यापौर्णमासीषु पर्वतिथिषु" "चतुष्पर्व्यां कृतसम्पूर्णचतुर्विधपौषधः," इत्यादिना वचनजा-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तेन पर्वतिथिसत्त्वस्य बहुधा प्रतिपादनात् । सिद्धे च पर्वतिथिसत्त्वे तिथिसामान्यरूपायामपर्वतिथौ अवश्यकर्तव्यस्य कस्यचिदनिरूपणात् अवश्यकर्तव्यविशिष्टा पर्वतिथिरेवात्रोद्देश्यतां भजते । अतस्तस्याः क्षयासम्भवात् तत्पूर्वस्या अपर्वतिथेरेव क्षयः फलति । पर्वतिथेस्तु अनेन वचनेनौदयिकीत्वं विधीयते । या पर्वतिथिरष्टम्यादिः सा पूर्वा कार्या । पूर्वानिष्ठमौदयिकीत्वमत्र भाव्यमिति । तिथेः क्षयो नाम नात्यन्ताभावो ध्वंसो वा । तस्यास्तद्दिने सत्त्वात् । किन्तु तस्यास्सूर्योदयानन्तरोत्पन्नत्वेन औदयिकीत्वाभावात् स एव क्षयशब्देनोच्यते । एवं च तद्दिने भवन्त्या अप्यष्टम्यादितिथेरुदयसम्बन्धाभावाद्यदौदयिकीत्वं गतं तदनेन विधीयते । अत्र हि न पूर्वात्वं विधेयतावच्छेदकम् । तस्य पूर्वमेव सत्त्वात् । न वाऽष्टमीत्वम्, तस्य विधातुमशक्यत्वस्य पूर्वमेव निरूपितत्वात् । किन्तु पूर्वानिष्ठं यदौदयिकीत्वं तदेवानेन विधीयतेऽप्राप्तत्वात् । एवं चाराधनाङ्गत्वेन विहितायां पर्वतिथौ अष्टम्यादौ पञ्चाङ्गदृष्टक्षयप्रयुक्तौदयिकीत्वाभावमपोह्य अनेन वचनेनौदयिकीत्वं विधीयते ।

अतश्चायमर्थस्सिद्धो भवति । पर्वतिथेः पञ्चाङ्गे क्षये दृष्टे सति ( उदयसम्बन्धाभावे सति ) तत्पूर्वतनापर्वतिथिनिष्ठमौदयिकीत्वं पर्वतिथौ भावयेदिति, एवञ्चानेन विधिनाऽष्टम्यादेरौदयिकीत्वे विहिते तद्विशिष्टा पर्वतिथिराराधनयोग्या भवति । "तिसृभ्यो हि करोति योत्तमा सा प्रथमा, या प्रथमा सा मध्यमा, या मध्यमा सोत्तमा, कुलायिनी त्रिवृतो विष्टुतिः" इति स्तोत्रीयग्गतक्रमवैपरीत्यविधानं विष्टुतौ तद्वत् । अथवा पूर्वा इत्येतदेवोद्देश्यवाचकं पदम् । प्रकरणात् योग्यताबलाद्वा तिथिरिति लभ्यते । टिप्पणे पर्वतिथीनां क्षये दृष्टे सति पूर्वा तिथिः, तिथिः—पर्वतिथिः कार्या इत्यर्थः ।

क्षीणत्वेन दृष्टाया अष्टम्यादिपर्वतिथेः पूर्वस्यां सप्तम्यादौ कियन्तोंऽशा वर्तन्त इति न ते विधातव्याः । "अप्राप्ते शास्त्रमर्थवत्"

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

इति न्यायात् । किन्तु अप्राप्तसूर्योदयावधिकांशानामेव विधानेन, अष्टम्यादिपर्वतिथिरेव पूर्वस्याः टिप्पणे औदयिकीत्वेन दृष्टाया-स्सप्तम्यादितिथेः स्थाने औदयिकी विधेयेति फलति ।

एतादृशं फलीभूतमर्थं मनसि निधायैव आचार्यश्रीसागरानन्द-सूरिभिः पूर्वस्या अपर्वतिथेः क्षयः—(व्यपदेशाभावः) कार्यः इत्यु-क्तमिति प्रतीयते । अयमेव चार्थस्साधीयान् शास्त्रसङ्गतश्च । एष एव च मध्यस्थेनापि प्रकारान्तरेणाङ्गीकृतः । "लौकिकटिप्पणे यदा काचित्तिथिः क्षीणेति निर्दिश्यते तदा तस्यास्सूर्योदयस्पर्शि-त्वमेव नास्ति । तदभावाच्चौदयिकीत्वासम्भवः । न च क्षीणतिथि-गतमाराधनं क्षीयते । कथं नाम तादृशी क्षीणा तिथिरौदयिकी स्यादिति विचार्यमाणे" इत्यादिकं कथयन् मध्यस्थः पर्वतिथेरौद-यिकीत्वसम्पादन एव खलु प्रयतमानो दृश्यते । अग्रे च तदेव महता प्रयत्नेन साधयत्यपि "औदयिक्येवाष्टमी भवती"त्या-दिना । एवं पूर्वमाचार्यश्रीसागरानन्दसूरिमतं महताऽऽडम्बरेण खण्डयन् अन्ततस्तदेव प्रकारान्तरेण साधयन् मध्यस्थः स्नुषाश्व-श्रून्यायमनुसरति स्मारयति च प्रभाकरमतखण्डनावसरे शास्त्र-दीपिकाकारीयं वचनमिदम्—"यदेवास्मदभिप्रेतं विधेर्नियमार्थत्वं महता प्रयत्नेन भवद्भिर्दूषितं तदेव भवद्भिरपि अनन्यगतिकत्वादा-श्रयणीयमापन्नम्" इति । अतो विषयेऽत्र मध्यस्थोक्तिर्दुरुक्तिरेव ।

एवं "क्षये पूर्वा तिथिः कार्या" इत्यस्य मीमांसाशास्त्रानुगतां व्याख्यां विधाय "वृद्धौ कार्या तथोत्तरा" इत्यस्यांशस्य तथैव व्याख्यां प्रदर्शयिष्यामः—कस्याश्चित् पर्वतिथेर्दिनद्वयोदयव्यापि-त्वरूपवृद्धौ टिप्पणे दृष्टायां उत्तरा द्वितीयदिनीयोदयस्पर्शिन्ये-वौदयिकी कार्या, न पूर्वेति । अनेन वचनेन पूर्वस्या औदयिकीत्वं परिसंख्यायते । सर्वत्र ह्यौदयिक्या एवाराधनाङ्गत्वं विहितम् । प्रकृते दिनद्वयेऽपि पर्वतिथिरौदयिकी भवति । दिनद्वये त्वाराधनं न भवितुमर्हति । आराधनाङ्गत्वेन तिथेर्विधानात् आराधनस्य



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

प्रधानत्वात्तिथेश्च गुणभूतत्वात्–गुणभूततिथ्यनुरोधेनाराधनस्य प्रधानभूतस्य द्विःकरणायोगात् गुणानुरोधेन प्रधानवृत्तेरन्याय्यत्वात्। अत एकस्मिन्नेव दिने आराधनार्थमौदयिकीत्वमपेक्षितम्। तत्राऽविशेषादुभयोरपि पाक्षिकतया प्राप्तौ सत्यामनेन वचनेन पूर्वस्यामौदयिकीत्वं परिसंख्यायते–पूर्वा नौदयिकी भवितुमर्हति, किन्तूत्तरैवेति ।

न च परिसंख्याङ्गीकारे स्वार्थहानिः, परार्थस्वीकारः, प्राप्तबाधश्चेति त्रैदोष्यापत्तिरिति शङ्कनीयम् । "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त" इतिवत् फलतः परिसंख्याङ्गीकारेण तदनापत्तेः । तथाहि—महाग्निचयनप्रकरणे "इमामगृभ्णन् रशनामृतस्य" इत्येको मन्त्रः श्रूयते । स च रशनाग्रहणप्रकाशकः। तत्र संवत्सरपर्यन्तं धार्यस्याग्नेः निक्षेपणाय विहिताया उखाया निर्माणाय मृदाहरणीया । तदर्थमेकोऽश्व एको गर्दभश्च मृत्खननदेशं प्रति नीयेते । खातां मृदं तयोरुपर्यारोप्य पुनरानयनकाले तदुभयकण्ठगते द्वे अपि रज्जू पृथक् पृथक् ग्रहीतव्ये। तत्रायं मन्त्रो रशनादानप्रकाशनसामर्थ्यरूपाल्लिङ्गादङ्गतया प्राप्नोति । परमुभयोरपि रशनात्वाविशेषाद्रशनाद्वयादानेऽपि प्राप्नुयात् । तन्मा भूदित्येतदर्थमयं विधिः–"इमामगृभ्णन्नशनामृतस्येत्यश्वाभिधानीमादत्त" इति । अनेन मन्त्रेण गर्दभरशनां नाददीत, किन्तु अश्वरशनामेवाददीत इति तदर्थः । न ह्यस्य विधेरश्वरशनादाने मन्त्रविनियोगे तात्पर्यम् । तस्य मन्त्रलिङ्गादेव प्राप्स्यमानत्वात् । किन्तु लिङ्गात्प्राप्तिस्वीकारेऽश्वाभिधान्यामिवाऽविशेषाद्गर्दभाभिधान्यामपि मन्त्रः प्राप्नुयात् । तद्व्यावृत्तिरनेन क्रियते । अतो गर्दभरशनातो मन्त्रस्य व्यावृत्तिरनेन क्रियत इत्ययं परिसंख्याविधिरित्युच्यते । एवं च विधेर्न मन्त्रस्याश्वरशनायां प्रापणे तात्पर्यम् । किन्तु गर्दभरशनातो निवृत्तावेवेति परिसंख्याविधिरेवायम् । न च त्रैदोष्यापत्तिः । लिङ्गा-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

दश्वाभिधान्यां यावन्मन्त्रः प्रवर्तते ततः पूर्वमेव प्रवृत्तः सन् विधिरश्वाभिधान्यां मन्त्रं विदधातीति अप्राप्तिदशायामेव विधेः प्रवृत्तत्वात् अपूर्वविधितुल्य एव। परन्तु एतद्विध्यभावे मन्त्रो लिङ्गादश्वाभिधान्यामिव गर्दभाभिधान्यामपि प्राप्नुयादिति तद्व्यावृत्तिफलकोऽयं विधिः स्वरूपतोऽपूर्वविधिरेव सन् परिसंख्याफलकत्वात् फलतः परिसंख्याविधिरित्युच्यते। इतरप्रमाणस्याप्रवृत्तिदशायामेव विधेः प्रवृत्तत्वाच्च न प्राप्तबाधादिकं त्रैदोष्यमिति मीमांसासिद्धान्तः। एवं प्रकृतेऽपि पर्वतिथेर्दिनद्वयसूर्योदयसम्बन्धरूपायां वृद्धौ सत्यां उभयत्राप्यौदयिकीत्वसत्त्वात् दिनद्वयेऽपि आराधनं पाक्षिकतया प्राप्तम्। तत्र "वृद्धौ कार्या तथोत्तरा" इत्यनेनोत्तरस्या औदयिकीत्वबोधनपूर्वकं पूर्वस्या औदयिकीत्वं व्यावर्त्यते। औदयिकीत्वाभावाच्च सा अपर्वतिथिस्सम्पद्यते। तत्पूर्ववर्तिनी सप्तम्येवौदयिकी द्विःसूर्योदयस्पर्शिनीति सैव वृद्धेति मन्तव्यम्। न च त्रैदोष्यम्। "वृद्धौ कार्या" इत्यस्य शास्त्रस्य द्वितीयस्या औदयिकीत्वप्रापणे तात्पर्याभावात्, पूर्वस्या औदयिकीत्वव्यावृत्तावेव तात्पर्येऽपि लौकिकटिप्पण्या लौकिकरूपतया सामान्यशास्त्ररूपत्वाद्वा लोकतः पूर्वं शास्त्रस्य सामान्यशास्त्रतः पूर्वं वा विशेषशास्त्रस्य प्रवृत्तेः शास्त्रसिद्धतया टिप्पणप्रवृत्तेः पूर्वमेव 'वृद्धौ कार्या' इत्यस्य प्रवृत्तत्वात्, एतच्छास्त्रप्रवृत्तिदशायां टिप्पण्या अप्रवृत्तत्वात् इतरप्रमाणस्याप्रवृत्तिदशायामेव शास्त्रस्यास्य प्रवृत्ततयाऽपूर्वविधित्वेऽपि एतद्विध्यभावेऽपि तस्य प्राप्स्यमानतया एतद्विधिप्रवृत्तेः फलजिज्ञासायां उभयत्राप्यौदयिकीत्वं स्यादित्येकतरत्र तद्व्यावृत्तिफलकोऽयं विधिरिति फलतः परिसंख्याविधिरेव। अप्राप्तिदशायामेव प्राप्तत्वाच्च न प्राप्तबाधादिदोषत्रयमिति।

अथवा वचनस्यास्य नियमविधित्वमङ्गीकृत्य व्याख्या क्रियते। लौकिकटिप्पणे कस्याश्चित्तिथेर्वृद्धौ दृष्टायां उत्तरा द्वितीयैव तिथिः

Shree Sudharmaswami Gyanbhandar-Umara, Surat　　www.umaragyanbhandar.com

तथा–पर्वतिथिः कार्या इति । अर्थात् टिप्पणे पर्वतिथेर्वृद्धौ सत्या-मुभयत्रापि पाक्षिकतया पर्वतिथित्वप्राप्तौ एतच्छास्त्रस्य नियाम-कत्वे सिद्धेऽपि नियमशास्त्रस्य विधिमुखेन प्रवृत्तेरेव शास्त्रसम्म-तत्वात् तादृशोऽर्थस्सुसम्पाद्यः । एवं च द्वितीयस्यां पर्वतिथाव-ष्टम्यादावौदयिकीत्वं नियम्यते–द्वितीयैव तिथिरौदयिकी भवेन्न पूर्वेति । एवञ्चानेन शास्त्रेण द्वितीयाया एवौदयिकीत्वबोधनात् प्रथमायास्तदभावात् तत्पूर्वतन्यास्सप्तम्या एव वृद्धिः इति सिद्धं भवति । एवं सति यन्मध्यस्थेनैतच्छ्लोकपादव्याख्यानावसरे "तेन नियमविधिविधायकेन शास्त्रेण तिथिवृद्धौ उत्तरस्यामेवौदयिकीत्वं नियम्यत इति क्वचित् टिप्पणे तिथीनां वृद्धौ दृष्टायां आराधना-र्थमुत्तरा द्वितीया तिथिः स्वीकर्तव्या" इति च परस्परविरुद्धं वचनं मध्यस्थस्य कथमुपादेयकोटिमारोहेत् । समानरूपतया श्रुते वाक्य-द्वये "क्षये पूर्वा तिथिः कार्या" इत्यत्र सप्तम्यां पूर्वस्यामष्टमी-विधानं, अष्टमीत्वविधानं वा, "वृद्धौ कार्या तथोत्तरा" इत्यत्र औदयिकीत्वनियमनम्, इति वैरूप्याङ्गीकरणे किं प्रमाणं ? किं वा फलमिति सानुरोधं पृष्टो मध्यस्थमहोदयः किं वा समुचित-मुत्तरं दद्यादिति न जानीमः । अथवा "मुखमस्तीति वक्तव्यं दशहस्ता हरीतकी" इति न्यायमनुसन्दधतो मध्यस्थस्य किमर्थ-मुत्तरं देयम् ?

किञ्च "वृद्धा तिथिः द्विरुदयं स्पृशतीति कतरा तिथिरौदयि-कीति सन्देहे 'वृद्धौ कार्या तथोत्तरा' इति नियमविधिविधायकेन शास्त्रेणोत्तरस्यामेवौदयिकीत्वं नियम्यते" इति मध्यस्थस्योक्तिः । नेयं शास्त्रीयां सरणिमनुसरति । यतो हि स्वयमेवाऽन्यत्रोक्तम्–"तिथिश्च प्रातः प्रत्याख्यानवेलायां या स्यात् सा प्रमाणम्" इति श्राद्धविधिप्रकरणस्थवचनोपन्यासपूर्वकं प्रत्याख्यानवेला च सूर्यो-दयसमयः । एतादृशी सूर्योदयस्पर्शिन्येव तिथिरौदयिकीत्युच्यते । इति । 'वृद्धायास्तिथेः सूर्योदयस्पर्शित्वे दिनद्वयेऽप्यौदयिकीत्वं स्यात्

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

एव सिध्यतीति कतरा तिथिरौदयिकीति सन्देहः कथमुदियात् ? उभयोरौदयिकीत्वेन पाक्षिकत्वाभावात् "नियमः पाक्षिके सति" इति पक्षप्राप्तविषयविषयकनियमविधित्वं वा तस्य कथं स्यात्। 'नियमविधिविधायकेन' इति शब्दे ते सर्वेऽपि दोषास्समुन्मिषन्ति ये 'अपूर्वविधिविधायकेन' इत्यत्र समुद्भाविताः। अतो "वृद्धौ कार्या तथोत्तरा" इत्यत्र मध्यस्थमते नियमविधिस्वरूपमेव न सिध्यति।

ननु महता प्रयासेन "वृद्धौ कार्या तथोत्तरा" इत्यस्य नियमविधित्वं मध्यस्थेनोक्तं दूषयद्भिर्भवद्भिस्स एव नियमविधिपक्षः स्वीकृतः कथमिति चेत्—नास्माकं पक्षेऽयं वाक्यार्थो यो मध्यस्थेनोल्लिखितः। किन्तु पर्वतिथित्वनियमनरूपः। पञ्चाङ्गे वृद्धौ क्षये वा कस्याश्चित्तिथेर्दृष्टायां पर्वतिथिरेकैव भवतीति मध्यस्थेनाऽपि स्वीकृतम्। अतश्च सत्यपि तिथेर्दिनद्वयेऽप्यौदयिकीत्वे आराधनस्यैकैव पर्वतिथिरपेक्षिता सा पूर्वा परा वेति सन्देहे परस्याः पक्षप्राप्ताया नियमनमप्राप्तांशपूरणरूपं घटत एवेति नास्माकं पक्षे दोषलेशोऽपि।

एवमेकां वृद्धां क्षीणां वा पर्वतिथिमधिकृत्य "क्षये पूर्वा तिथिः कार्या, वृद्धौ कार्या तथोत्तरा" इति वचनार्थो विचारितः। इदानीं पर्वानन्तरपर्वतिथिषु विचारः क्रियते। तत्र पूर्णिमामावास्यादिषु पर्वानन्तरपर्वतिथिषु टिप्पणानुसारेण क्षीणासु वृद्धासु वा तत्पूर्वस्याश्चतुर्दश्या अपि पर्वतिथित्वेन तस्याः क्षयो वृद्धिर्वा न भवितुमर्हति। एकस्मिन् दिने औदयिकीतिथिरेकैव भवति। एवं च पूर्णिमाया अमावास्याया वा टिप्पणे क्षये दृष्टे तस्याः पर्वतिथित्वात् क्षयासम्भवेन "क्षये पूर्वा तिथिः कार्या" इत्यनेनौदयिकीत्वे प्रसाधिते तत्पूर्वस्याश्चतुर्दश्या अपि पर्वतिथित्वेनौदयिकीत्वावश्यकतया तत्पूर्वस्यास्त्रयोदश्या एव क्षयं कृत्वा तस्मिन् दिने औदयिकीत्वं सम्पाद्याराधनं कार्यम्।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

एवं पौर्णमास्या अमावास्याया वा वृद्धौ टिप्पणे दृष्टायां पूर्वस्या औदयिकीत्वनिराकरणद्वारा द्वितीयस्या एव तिथेरौदयिकीत्वनिर्णयात् पूर्वस्या अनौदयिकीत्वेन तत्पूर्वस्याश्चतुर्दश्या एवौदयिकीत्वप्राप्त्या तस्या अपि पर्वतिथित्वेन वृद्धेरयोगात् तत्पूर्वतन्यास्त्रयोदश्या एवाऽपर्वतिथेर्वृद्धिं कृत्वा द्व्युदयस्पर्शित्वमापाद्य लौकिकटिप्पणप्राप्तचतुर्दश्यामपि त्रयोदश्या एवौदयिकीत्वसम्पादनम्। एवमेव पर्वानन्तरपर्वतिथिषु पौर्णमास्यमावास्यादिषु वृद्धिक्षयविषयिणी व्यवस्था सिध्यति। एतद् व्यवस्थानुकूलानि प्रमाणान्यपि बहुधा जैनागमानुसारीणि दृश्यन्ते। तानि यथा–

श्रीविजयदेवसूरिविरचिते मतपत्रके तिथिहानिवृद्धिविषये–"ननु पूर्णिमा चतुर्दश्यां सङ्क्रामिता तदा भवद्भिर्द्वे चतुर्दश्यौ कथं न क्रियेते तृतीयस्थानवर्तिनी त्रयोदशी कथं वर्द्धिता इति त्वं पृच्छसि, शृणु तत्रोत्तरम्। जैनटिप्पणके तावत् पर्वतिथीनां वृद्धिरेव न भवति ततः परमार्थतस्त्रयोदश्येव वर्धिता" इति। तत्रैवापरत्र– "तस्मात् त्यज कदाग्रहम्, कुरु पूर्णिमाभिवृद्धौ द्वे एव त्रयोदश्यौ" इति, तत्रैवान्यत्र च–"यथावदागमानुसारेण पूर्वाचार्यपरम्परया च प्रवर्तितव्यम्। परं कदाग्रहं कृत्वा कुमार्गप्रवर्तनं न कार्यम्। उत्सूत्रप्ररूपणेनानन्तसंसारवृद्धेः। तस्मात् सिद्धमेतत्–पूर्णिमाभिवृद्धौ त्रयोदश्यभिवर्धनमिति" इत्यादीनि। प्रमाणैरेभिष्टिप्पणे पर्वतिथेर्वृद्धौ दृष्टायां पर्वानन्तरपर्वतिथेर्वा तथात्वे परमार्थतोऽपर्वतिथेरेव वृद्धिः कार्येति स्पष्टमेवावगम्यते। अतो रीतिरियमेव शास्त्रसङ्गता अविरुद्धा च। अत एव चेयमनुसृता रीतिराचार्यश्रीसागरानन्दसूरिभिरपि। तैः पूर्वाचार्योपज्ञानि प्रमाणान्युपन्यस्तानि बहूनि स्वमतपरिपोषणाय। तानि च विचार्यमाणानि सर्वथा प्रमाणपदवीं नातिवर्तन्ते। तथाहि—

महोपाध्यायश्रीधर्मसागरप्रणीततत्त्वतरङ्गिण्याम्–"नन्वौदयिकतिथिस्वीकारान्यतिथितिरस्कारप्रवणयोरावयोः कथं त्रयोदश्या

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अपि चतुर्दशीत्वेन स्वीकारो युक्तः", इत्याशंक्य "तत्र त्रयोदशीति व्यपदेशस्याप्यसंभवात्, किन्तु प्रायश्चित्तादिविधौ चतुर्दश्येवेति व्यपदिश्यमानत्वात्" इति समाहितम्। एतेनेदं सिध्यति–लौकिकटिप्पणे त्रयोदशीत्वेन श्रुताया अपि 'क्षये पूर्वा तिथिः कार्या' इत्युमास्वातिप्रघोषत्वेन प्रसिद्धेन शास्त्रेण पर्वतिथेरौदयिकीसंज्ञाविधानात् तस्याः क्षयाभावात् फलतोऽपर्वतिथेरेव क्षयसिद्धेः तत्र चतुर्दश्येव शास्त्रतः प्राप्तेति सैव व्यपदेशमर्हति। व्यपदिश्यते च तथा प्रायश्चित्तादौ। न तु त्रयोदशीति व्यपदेशः क्रियत इति।

अयमभिप्रायः–शास्त्रेण पर्वतिथेः क्षयाभावकथनादपर्वतिथेरर्थात् क्षयप्राप्तेः चतुर्दश्याश्च पर्वतिथित्वेन तत्क्षयस्याकरणात् तत्पूर्वस्यास्त्रयोदश्या एव क्षये कृते क्षीणतिथेर्व्यपदेशः प्रयोजनाभावान्न युक्तः। अत एव तस्य व्यपदेशो न क्रियते, किन्तु चतुर्दश्या एव भूमाधिकरणन्यायेन भूयसा व्यपदेशः क्रियते। तथाहि–सृष्टीरुपदधाति यथा सृष्टमेवावरुन्धे" इति चयनप्रकरणे श्रूयते। तत्र सृष्टिशब्देन तद्वानासामुपधानो मन्त्र–"इतिष्टकासु लुक् च मतोः" इति पाणिनिसूत्रेण सिद्धया प्रक्रियया सृष्टिवाचकपदघटितमन्त्रोपधेया इष्टका उच्यते। तत्र विशेष्यभूतानामिष्टकानां प्राप्तत्वात् विशेषणीभूतानां मन्त्राणामेव विधिः। तत्र सृष्टिपदेन सृष्ट्यसृष्टिसमुदायरूपसप्तदशसंख्याकमन्त्रा अभिधीयन्ते। तस्मिन् समुदाये तिसृभिरस्तुवत ब्रह्मासृज्यत, इत्याद्याश्चतुर्दशमन्त्रास्सृष्टिवाचकपदघटिताः। एकयाऽस्तुवत प्रजा अधीयत, इत्यादिकास्त्रयो मन्त्रास्तदघटिताः। तादृशोभयघटितसमुदायस्सृष्टिशब्देनोच्यते भूम्ना बाहुल्येन। अर्थात् समुदाये सृष्टिवाचकपदघटिता मन्त्रा बहुलं सन्तीति। एवं दिने यस्मिन् त्रयोदश्याः क्षयश्शास्त्रेणोक्तः तस्मिन् दिने अधिकांशश्चतुर्दश्या व्याप्तः तदव्याप्तश्चाल्पीयानंशः। तादृशोभयांशसमुदायश्चतुर्दशीपदेन

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

व्यपदिश्यते। तथैव व्यपदेशमर्हति। चतुर्दश्यंशानामेव तत्र बाहुल्यात्, अतश्चतुर्दशीव्यपदेश एव भूमन्यायेन युक्ततर इति।

एवं च लौकिकटिप्पणेन दुर्बलेन प्राप्तमपि त्रयोदशीत्वं शास्त्रेण प्रबलेन बाध्यते। भवति हि दुर्बलेन प्रमाणेन प्रापितस्य पदार्थस्य प्रबलप्रमाणबोधितेन तेन बाधः। अङ्गीकृतश्चायं विषयो बहुत्र पूर्वमीमांसायां विरोधाधिकरणे बलाबलाधिकरणादौ च। न च दुर्बलस्यापि टिप्पणस्य प्रबलेन शास्त्रेण बाधे तस्यानर्थक्यप्रसङ्गः, एवं च आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायेन टिप्पणस्यैव प्राबल्यं कुतो न स्यादिति वाच्यम्। टिप्पणस्य तिथ्यन्तरे चारितार्थ्यात् आनर्थक्याप्रसक्तेः। आनर्थक्यप्रतिहतानामेव बलाबलवैपरीत्यस्य तन्न्यायविषयत्वात्। न चोमास्वातिवचःप्रघोषत्वेन प्रसिद्धस्य 'क्षये पूर्वा' इत्यस्य वचनस्य जैनसङ्घेन बहोः कालादारभ्य यथा प्रामाण्यमङ्गीकृतं तद्वल्लौकिकटिप्पणस्यापि प्रामाण्याङ्गीकारात् कथं तस्य दौर्बल्यमिति वाच्यम्। टिप्पणं हि गणनात्मकं, गणनविषये प्रमाणम्, न तु शास्त्रैकसमधिगम्ये तिथ्यादिनिर्णयविषये। अतश्च यथा वैदिकसम्प्रदाये तत्तत्तिथ्यादीनामुदयास्तमसम्बन्धमात्रं पञ्चाङ्गेन निर्णीयते इति तस्मिन्नेव विषये तस्य प्रामाण्यमङ्गीक्रियते, न तु तिथिविधादिविषये। तिथिः कियता कालेन तिथ्यन्तरं विध्यति? कुत्र पूर्वा तिथिर्ग्राह्या? कुत्रोत्तरा? औदयिकीत्वं च कियत्कालावच्छेदोदयसम्बन्धित्वम्? इत्यादिकं धर्मशास्त्रैकसमधिगम्यम्। न तत्र पञ्चाङ्गं क्रमते। क्रममाणमपि स्वविषयादन्यत्र प्रवृत्तं अनुवादेयतामेवापद्येत। न हि व्याकरणैकसमधिगम्ये प्रकृतिप्रत्ययविधिनियमादिरूपे प्रवर्तमानं तद्विरुद्धं कथयत् सांख्ययोगमीमांसादिकं वा शास्त्रं तत्र प्रामाण्यमश्नुवति। उक्तं ह्याचार्यकुमारिलेन—"आचार्याः स्वविषयादन्यत्र वदन्तोऽनादर्तव्या भवेयुः" इति।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

स्मृतेर्वेदविरोधे तु, परित्यागो यथा भवेत् ।
तथैव लौकिकं वाक्यं, स्मृतिबाधे परित्यजेत् ॥
एकादश्यष्टमी षष्ठी, पौर्णमासी चतुर्दशी ।
अमावास्या तृतीया च, ता उपोष्याः परान्विताः ॥
अन्याश्च तिथयस्सर्वा, उपोष्याः पूर्वसंयुताः ।
सा तिथिस्तच्च नक्षत्रं, यस्यामभ्युदितो रविः ॥

इत्यादिभिर्वचननिचयैर्वैदिकसम्प्रदायेऽपि सन्दिग्धानां परस्परविरुद्धानां वा विषयाणां धर्मशास्त्रैकनिर्णेयत्वावगमात् । अत एव धर्मशास्त्राविरुद्धस्यैव ज्योतिश्शास्त्रस्य प्रामाण्यमुररीकृतं शास्त्रेषु । एवं च टिप्पणे गणनानुसारेण कस्याश्चित्तिथेरौदयिकीत्वे प्राप्तेऽपि तदपोद्य शास्त्रेण यद्यन्यत्र तद्विधीयेत तदेव ग्राह्यं भवेत् । यथा वैदिकसम्प्रदाये पर्वण्यौदयिके कुर्युश्श्रावणं तैत्तिरीयकाः । इति शास्त्रेणौदयिक्यां पूर्णिमायां तैत्तिरीयशाखिनामुपाकर्म विहितम् । औदयिकीत्वं च तद्दिनीयसूर्योदयकालसम्बन्धमात्रेणापि सिध्यत्येव । तच्च पञ्चाङ्गमात्रेणापि ज्ञातुं शक्यते । न तु तावन्मात्रेण तस्या औदयिकीत्वम् । किन्तु "श्रावणी पौर्णमासी तु, सङ्गवात्परतो यदि । तदैवौदयिकी ग्राह्या, नान्यदौदयिकी भवेत्" इति धर्मशास्त्रवचनेन उदयादिसङ्गवान्तकालव्यापिन्या एवौदयिकीत्वबोधनात् तस्या एवौदयिकीत्वम् । न केवलोदयमात्रस्पर्शिन्या इति सर्वैरङ्गीकारात् । उक्तं हि स्मृतिमुक्ताफले पूर्वोदाहृतवचनोद्धरणपूर्वकं "तदेवं उदयादिद्वादशघटिकाधिककिञ्चित्कालव्यापिन्याः पौर्णमास्या एवौदयिकीत्वम् । तस्यामेव यजुश्शाखिनामुपाकर्म, उदयादिद्वादशघटिकाधिककिञ्चित्कालव्यापिनि हस्तनक्षत्रे छन्दोगानामिति । तद्वदेवात्रापि, "क्षये पूर्वा" इत्युमास्वातिप्रघोषरूपेण शास्त्रेणावबोधितस्यैव प्रमाणतया स्वीकारो युक्तः । नान्यस्येत्येव युक्ततरम् । अतश्च टिप्पणस्य स्वविषये सत्यपि प्रामाण्ये पारिभाषिकौदयिकीत्वविषये शास्त्रं तदनुसार्य-



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

चार्यवचनं वा प्रमाणं भवितुमर्हतीति । एवं च यदा लौकिकटिप्पणानुसारेण पूर्णिमाया अमावास्याया वा क्षयो दृश्यते तदा पर्वतिथित्वाच्चतुर्दश्याः पूर्वस्याः क्षयमकृत्वा तत्पूर्ववर्तिन्यास्त्रयोदश्या अपर्वतिथेरेव (आराधनायां व्यपदेशाभावरूपः) क्षयः—व्यपदेशाभावः कार्यः इति आचार्यश्रीसागरानन्दसूरिभिरुच्यते तत्सर्वथा शास्त्रीयमेवेत्यत्र नास्ति संशयः ।

किञ्च—पर्वतिथेष्टिप्पणे क्षयदर्शनेऽपि न शास्त्रतोऽत्यन्तलोपोऽङ्गीक्रियते मध्यस्थेनापि । आराधनार्थं तस्यास्सप्तम्यां वेव विधानाङ्गीकारात् । अतः प्रथमतो लोपमापाद्य व्यपदिश्य वा अनन्तरं तस्या विधानापेक्षया स्थिताया एव तस्या औदयिकीत्वं व्यपदेशः परं विधीयते लाघवादित्याचार्यसागरानन्दसूरिमतम् । अवस्तन्मतखण्डने मध्यस्थप्रवृत्तेः कारणं कदाग्रहं विना नान्यत् पश्यामः ।

"एवं वृद्धौ कार्या तथोत्तरा" इत्यत्राप्यपर्वतिथेरेव वृद्धिः संज्ञेया न पर्वतिथेः । अनेनैव न्यायेन पर्वानन्तरपर्वतिथिस्थले द्वयोरपि पर्वतिथ्योः क्षयमकृत्वा तत्पूर्वतन्या अपर्वतिथेरेव क्षयः कार्यः । वृद्धिस्थले पूर्वस्या औदयिकीत्वनिराकरणात् द्वितीयस्या एवौदयिकीत्वनियमनेन पूर्वस्या औदयिकीत्वाभावसिद्धेर्वा तस्या अपर्वतिथित्वात् तत्पूर्वस्याश्चतुर्दश्या अपि पर्वतिथित्वेन तस्या अपि वृद्ध्यसम्भवात् तत्पूर्वस्यास्त्रयोदश्या एव वृद्धिः कार्या । तथा च पूर्णिमावृद्धौ द्वितीयपूर्णिमायां पूर्णिमाप्रयुक्तमाराधनं टिप्पणप्रथमपूर्णिमायां शास्त्रसिद्धचतुर्दशीरूपायां चतुर्दशीप्रयुक्तमाराधनं च कार्यमिति सिध्यति ।

एवं भाद्रपदशुक्लपञ्चम्याः कल्पसूत्राद्यागमग्रन्थानुसारेण सांवत्सरिकप्रतिक्रमणार्थत्वं नियतमेव कदाचिदासीत् । परन्तु कालकाचार्यैः कस्यचिद्राज्ञः प्रार्थनानुसारेण इन्द्रमहनाम्ना प्रसिद्धेन भाद्रपदशुक्लपञ्चम्यामनुष्ठेयतया निश्चितेन महोत्सवेन सह विरोध-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

परिहाराय भाद्रपदशुक्लचतुर्थ्यां तत् परावर्तितमासीत् । ततःप्रभृति भाद्रपदशुक्लचतुर्थ्येव सा सांवत्सरिका पर्वतिथिस्समपद्यत । पञ्चम्यास्तु तत्पर्वतिथित्वमेव गतम् । अतश्च भाद्रपदशुक्लचतुर्थ्या एव तत्पर्वतिथित्वात् तत्पञ्चम्याः पर्वानन्तरपर्वतिथित्वमभ्युपगम्य तृतीयायाः क्षयवृद्धिसम्पादनं श्रीमदाचार्यसागरानन्दसूरीणाम-नावश्यकमिति मध्यस्थो ब्रवीति । तदिदमसङ्गतम् । हीरप्रश्ने-पञ्चमीतिथिस्त्रुटिता भवति तदा तत्तपः कस्यां तिथौ क्रियते इति प्रश्नमुत्थाप्य यदा पञ्चमीतिथिस्त्रुटिता भवति तदा तत्तपः पूर्वस्यां तिथौ क्रियते इति सामान्यत एव पञ्चमीनिर्देशात् तत्र भाद्रपद-शुक्लपञ्चम्या व्यावृत्त्यदर्शनात्, "बीया पञ्चमी अट्ठमी एगारसी चउदसी पणतिहिओ । एआओ सुयतिहीओ गोयमगणहारिणा भणिया" इति गाथायां सामान्यत एव पञ्चमीग्रहणात् गीतार्था-चीर्णत्वेन परम्पराव्यवहारेण च पञ्चम्यास्सामान्यपर्वतिथित्वम-स्त्येव । कालकाचार्येण प्रधानपर्वतिथित्वस्यैव परिवर्तनात् । पर्व-तिथित्वं च नियताराधनाधिकरणत्वम् । तच्चाष्टमीचतुर्थ्योरिवा-न्यासामपि तिथीनामस्त्येव बह्वीनाम् । जैनागमेषु तथा दर्शनात् । तथाहि—आवश्यकचूर्णौ—"अट्ठमीपन्नरसीसु य नियमेण हविज्ज पोसहिओ" इति, व्यवहारवृत्तौ—एतेषु चाष्टम्यादिदिवसेषु चैत्यानाम-न्यवसतिगतसुसाधूनां वा अवन्दने प्रत्येकं प्रायश्चित्तम्" इति । श्रीतत्त्वार्थटीकायां हारिभद्रीयायां "प्रतिपदादिषु अनियमं दर्श-यति, अष्टम्यादिषु नियमः" इति, श्रीतत्त्वार्थसिद्धसेनटीकायां "अनेन चान्यासु तिथिषु अनियमं दर्शयति, नावश्यंतयाऽन्यासु कर्त्तव्यः, अष्टम्यादिषु तु नियमेन कार्यः" इति । एभिर्वचनैरष्टम्या-दिषु पर्वतिथिषु बह्वीषु तपसो नियतत्वस्य स्पष्टमेव प्रतिपाद-नात् । एतेन मध्यस्थेन सप्तमविवादारम्भे निर्णयपत्रस्य नवम-पृष्ठे—"पाक्षिकं प्रतिक्रमणं चतुर्दशीतिथिनियतमाराधनं, तथा सांवत्सरिकं प्रतिक्रमणं भाद्रपदशुक्लचतुर्थीनियतमाराधनमिति द्वे

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

आराधने तिथिनियते इति नो निर्णयः" इति स्वनिर्णय उक्तः स स्वस्मा एव रोचेत, नान्येभ्यश्शास्त्रसंस्कृतमतिभ्यो विद्वद्वरेभ्यः।

एवं च पञ्चाङ्गे क्षये दृष्टे सति पञ्चम्याः पर्वतिथित्वेन तस्याः क्षयासम्भवात् तत्पूर्वस्याश्चतुर्थ्या अपि कालकाचार्यवचनात्तत्पर्वतिथित्वप्राप्तेः तस्या अपि क्षयासम्भवात् तत्पूर्वस्यास्तृतीयाया एव क्षयः सिध्यति। एतदभिप्रायकमेव सागरानन्दसूरिवचनमिति न तत्र दोषलेशोऽप्युद्भावयितुं शक्यते।

जीतव्यवहारेणाऽप्ययमेवार्थस्सिध्यति। जीतव्यवहारस्वरूपं च स्थानाङ्गसूत्रे पञ्चविधो व्यवहार उक्तः। तद्यथा (१) आगमः (२) श्रुतम् (३) आज्ञा (४) धारणा (५) जीतं चेति। तत्र यदा व्यवहर्तुरागमो भवेत् तदा तेनैव व्यवहर्तव्यम्। तदभावे श्रुतेन व्यवहर्तव्यम्, एवमन्यत्रापि पूर्वपूर्वाभावे परेण परेण व्यवहर्तव्यमित्यादि। एवं जीतकल्पभाष्ये-"वत्त-णुवत्त-पवत्तो बहुसो आसेवितो महजणेणं। एसो उ जीतकप्पो पंचमओ होति ववहारो" इति। अस्यायमाशयः-एकपुरुषीयव्यवहारो वृत्तः। द्विपुरुषीयव्यवहार अणुवृत्तः। त्रिपुरुषीयव्यवहारः प्रवृत्तः। ततोऽधिकमहापुरुषेणासकृदाचरितस्तु जीतमित्युच्यत इति। श्रीविजयदेवसूरिसामाचार्याश्च जीतव्यवहारसिद्धत्वं सुस्पष्टमेव। तदेतदग्रे निरूपयिष्यते। हीरप्रश्ने चैवं दृश्यते--पञ्चमी तिथिस्त्रुटिता भवति तदा तत्तपः कस्यां तिथौ क्रियते? पूर्णिमायां च त्रुटितायां कुत्रेति प्रश्नस्योत्तरम्-पञ्चमी तिथिस्त्रुटिता भवति तदा तत्तपः पूर्वस्यां क्रियते, पूर्णिमायां च त्रुटितायां त्रयोदशीचतुर्दश्योः क्रियते। त्रयोदश्यां विस्मृतौ तु प्रतिपद्यपि" इति। अनेनेदमवगम्यते पूर्णिमामावास्ययोर्वृद्धौ त्रयोदश्या एव वृद्धिर्भवतीति। न च विजयदेवसामाचार्या जीतव्यवहारसिद्धत्वे किं मानमिति शङ्कनीयम्। सप्तदशशताब्दीत आरभ्य विवादोत्पत्तिसमयं यावत् तपोगच्छीयेन चतुर्विधेनाऽपि श्रीजैनसङ्घेन श्रीविजयदेवसूरि-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सामाचारी समाचरितेति तत्कालीनैर्ग्रन्थैस्ताम्रशासनैराचारैश्चाव-गम्यते। अद्यापि विवादेऽत्रासंपृक्तैस्तटस्थैस्सर्वैरपि तपोगच्छीयैरा-चार्यैस्सैव सामाचारी समाचार्यते। श्रीमदाचार्यविजयरामचन्द्रसू-रीणां ये परमगुरवः तेषां परमगुरुभिः श्रीविजयानन्दसूरिभिः निज-निर्मितश्रीजैनतत्त्वादर्शग्रन्थे श्रीविजयदेवसूरिगच्छीयत्वमेव स्वस्य प्रत्यपादि। किञ्च—आचार्यश्रीविजयदेवसूरीणामनुपमं पाण्डित्यं अप्रतिहतं प्रतिभावैभवं चाद्यापि पण्डितवरैस्स्तूयत एव। यतो न्यायविशारदैः श्रीयशोविजयोपाध्यायैर्निजनिर्मितज्ञानसागरे—

गच्छे श्रीविजयादिदेवसुगुरोः स्वच्छे गुणानां गणैः,
प्रौढिं प्रौढिमधाम्नि जीतविजयप्राज्ञाः परामैयरुः।
तत्सातीर्थ्यभृतां नयादिविजयप्राज्ञोत्तमानां शिशोः,
श्रीमन्न्यायविशारदस्य कृतिनामेषा कृतिः प्रीतये॥

इति देवसूरिगच्छीयत्वमेव स्वस्य प्रतिपाद्यते स्म॥

एवं यशोविजयोपाध्यायप्रभृतिभिः अन्यैरप्याचार्यवर्यैः बहुभिः
"सूरिः श्रीविजयादिदेवसुगुरुः तत्पट्टभास्वानभूत्
भूयांस्तत्सुकृतानुमोदनकृते ग्रन्थोऽयमुज्जृम्भतात्।"

"जयति विजयदेवस्सूरिरेतस्य पट्टे,
मुकुटमणिरिवोद्यत्कीर्तिकान्तिप्रतापः।
प्रथितपृथुतपःश्रीः शुद्धधीरिन्द्रभूतेः,
प्रतिनिधिरधिदक्षो जङ्गमः कल्पवृक्षः॥"

इत्यादिना स्तुतिकदम्बकेन श्रीविजयदेवसूरीन् सगौरवगरिमप्रशं-सद्भिः श्रीदेवसूरिगच्छीयत्वमेवात्मनस्साध्वङ्गीकृतम्। ते च सर्वेऽ-प्याचार्यान् महापुरुषत्वेन समादृतावन्त एवेति तैस्तैः प्रमाणैरव-गम्यते। अतश्च जीतव्यवहारत्वसिद्धयेऽपेक्षितेषु चतुर्ष्वंशेषु यः प्रथमोऽंशो युगप्रधानसदृशाचार्यप्रवर्तितत्वमिति तदत्र निर्विवादं प्रसिध्यति। अभ्युपगतश्चायमंशो मध्यस्थेनाऽपि "यद्यपि आचार्य-श्रीविजयदेवसूरयस्सङ्घप्रधाना आसन्" इति ब्रुवता। (१)

Shree Sudharmaswami Gyanbhandar-Umara, Surat　　www.umaragyanbhandar.com

पर्वतिथीनां टिप्पणानुसारेण परमार्थत एव क्षयवृद्धिस्वीकारे तत्तत्तिथिष्वनुष्ठेयमाराधनं लुप्तं भवेदिति तदलोपाय श्रीविजयदेवसूरीणां प्रवृत्तिरिति तदानींतनव्यवहारादाचार्यान्तरवचनाच्च स्पष्टमेव प्रतीयते । (२)

पूर्वमुपपादितरीत्या केनापि शास्त्रेण सह तत्प्रवर्तितधर्मस्य विरोधं न पश्यामो वयम् । यदत्र मध्यस्थेन विरोधोद्भावनाय ये केचन हेतवः प्रतिपादिताः ते सर्वथा न हेतवः, किन्तु हेत्वाभासाः इति श्रीमद्भिः पण्डितप्रकाण्डैः श्रीतुलाकृष्णझामहोदयैः स्वनिबन्धे सम्यङ्निरूपितमिति न तत्र पुनः पिष्टं पिष्यतेऽस्माभिः । एवं च 'अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्, तेष्वदर्शनाद्विरोधस्य,' इति शिष्टाकोपाधिकरणसूत्रेण महर्षिजैमिनीयेन "वैदिकैः स्मर्यमाणत्वात् तत्परिग्रहदार्ढ्यतः" इति स्मृत्यधिकरणसिद्धान्तन्यायेन च, अद्ययावद्बहुभिः जैनाचार्यैः अविच्छिन्नपरम्परया परिग्रहाच्च तत्प्रामाण्यविषये न कापि संशीतिः ।

एवं च जैनाचार्यैः बहुभिरनुमतत्वं संविग्नगीतार्थैरप्रतिषेधित्वं च सिध्यति । सति चैवं जैनशास्त्रेषु जीतव्यवहारस्य प्रामाण्यसिद्धये येऽपेक्षिताश्चत्वारोऽशाः (१) युगप्रधानसदृशाचार्यप्रवर्तितत्वम् । किमपि विशिष्टं प्रयोजनमुद्दिश्य प्रवर्तनम् । (२) प्रवर्तितस्य धर्मस्य शास्त्रैस्सहाविरोधः (३) संविग्नगीतार्थाचार्यैरप्रतिषेधित्वं बहुभिरनुमतत्वं चेति ते सर्वेऽप्यत्र समग्रतयोपलभ्यन्त एवेति श्रीविजयदेवसूर्युल्लिखितायां सामाचार्यां जीतव्यवहारत्वं सर्वथा सिध्यत्येव।

न च पाश्चात्यैः कैश्चिदनङ्गीकारात् कथं सर्वानुमतं प्रामाण्यमिति वाच्यम् । न हि तथा कतिपयानङ्गीकारः प्रामाण्यं विहन्तुमीष्टे । महाजनैर्भूयः परिग्रहस्यैव प्रामाण्यव्यवस्थापकत्वात् । कतिपयापरिग्रहस्य हेत्वधिकरणन्यायेन कारणान्तरमूलत्वस्यापि सम्भावयितुं शक्यत्वात् । सामाचारीप्रवर्तनकालिकैः कैश्चिदप्याचार्यैरनिषिद्धत्वाच्च । मध्यस्थेनाऽपि तदनिरूपणाच्च ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अथ चत्वारिंशज्जैनाचार्याः प्रायो विद्यमानाः सन्ति । तेषु वर्जयित्वा त्रिचतुरानाचार्यान् सर्वेऽप्याचार्याः श्रीमदाचार्यदेवसूरिप्रतां सामाचारीमेव समाचरन् समाचरन्ति च । ये नाम केचित् त्रिचतुरा इदानींतना नाऽनुमन्यन्ते तेऽप्येतद्विवादोत्थापनकालात् पूर्वं तामेव सामाचारीं प्रेम्णा समाचरन्निति सप्रमाणं निरूपयितुं शक्यते । किं बहुना, एतद्विवादोत्थितेरव्यवहितपूर्वकालं यावत् आचार्यश्रीविजयरामचन्द्रसूरयोऽप्येनामेव सामाचारीमनुसरन्त आसन्निति । अतश्च श्रीमदाचार्यविजयदेवसूरिप्रदर्शितायां सामाचार्यां प्राचीनाचार्यप्रतिषिद्धत्वे किमपि प्रमाणं आचार्यसम्मतिं वा कदर्शीं प्रदर्शयितुमशक्नुवन् "यद्यप्याचार्याः श्रीविजयदेवसूरयस्तु प्रमाणा आसन् तथापि जीतव्यवहार एवासिद्धः । तद्-प्राप्त देवसूरिमतासामाचारीप्रमाणं तु दूरादेवाऽवस्थितम्" इति केवलं स्वाग्रहेणैव तत् स्थापयन् मध्यस्थः केनापि निगूढेन कारणेन सुदूरं नीत इति प्रतिभाति ।

श्रीमदाचार्यसागरानन्दसूरिभिः स्वमतपरिपोषणाय मध्यस्थाय प्रदर्शितेषु ग्रन्थेषु "श्रीतिथिह्रानिवृद्धिविचारः" इति शीर्षकोट्टङ्कितः पत्रचतुष्टयात्मको ग्रन्थः कश्चिल्लघुकायः । सोऽप्रमाणमिति मध्यस्थस्य आशयः । तदुपोद्बलनाय तेन प्रतिपादितासु युक्तिषु अन्यतमैका युक्तिः चतुष्पत्रात्मकस्य इति । तदसङ्गतम् । नहि चतुष्पत्रात्मकत्वं प्रामाण्यविघटकम् अप्रामाण्यापादकं वा क्वचिद्दृष्टं श्रुतं वा । यद्येवं सांख्ययोगवेदान्तशास्त्राणां मूलभूतानि सूत्राणि कतिपयेष्वेव पत्रेषु समाप्येरन्निति कथं तेषामप्रामाण्यमापत्तिर्निवार्येत । न च तत् सर्वथा मध्यस्थस्यापीष्टमिति मन्यामहे । का अनुबन्धे शायबाहुल्यदर्शनमप्यप्रामाण्ये हेतुरुक्तो मध्यस्थेन । कथमिदं युक्ततरं मन्यते मध्यस्थ इति न वयमुत्प्रेक्षितुं शक्नुमः । प्रत्नतमास्मदाद्यग्रन्थास्सर्वेऽपि प्रायश एतद्रूपा एवोपलभ्यन्ते, तत्त्वतः [illegible]स्वीकारेऽनिष्टापत्तिदर्शनपराः समेऽपि धर्म-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ग्रन्थाः अपरं तेषु निन्दा शापो वा न निन्दायै शापाय वा प्रावर्तेताम्। अपि तु नहि निन्दान्यायेन प्रतिपाद्यविषयस्तवनाय। नहि निन्दा निन्द्यं निन्दितुं प्रवृत्ता। अपि तु विधेयं स्तोतुं इति हि तन्न्यायस्वरूपम्। अतश्शापादीनां स्वार्थे तात्पर्याभावान्न प्रामाण्यविघटकत्वमप्रामाण्यापादकत्वं वेति सिद्धम्।

इदं च निःसंदिग्धमवगम्यते—यः श्रीसागरानन्दसूरिभिः मध्यस्थाय प्रदर्शितो लघुकायो ग्रन्थः स न तैः स्वयं प्रणीत इति। यतो मध्यस्थ एव स्पष्टमङ्गीकरोति स ग्रन्थो वैक्रमीयपञ्चनवत्युत्तराष्टादशशतवर्षात् (१८९५) पूर्वकालिक इति। यावत् स ग्रन्थो न प्रमाणान्तरैर्विरुन्धे, न वा प्रमाणान्तरैर्बाध्यते तावत् को वा कथं वा तस्य प्रामाण्यं विहन्तुमीष्टे?। एवं च कश्चित् कञ्चन पक्षं मध्यस्थस्य पुरत उपस्थाप्य तत्परिपोषणाय प्राचीनं कञ्चन ग्रन्थं महाजनपरिगृहीतं निर्दिशति चेत् प्रमाणान्तराविरुद्धं तस्य स्वकपोलमात्रकल्पितैर्हेत्वाभासैर्निरसनं न मध्यस्थस्य प्रौढिमानमावहति।

अन्यच्च श्रीमदाचार्यसागरानन्दसूरिप्रदर्शितानां सर्वेषां ग्रन्थानां निर्मूलमप्रामाण्यमापादयन् मध्यस्थः जैनागमानां सर्वेषामेव प्रायशोऽप्रामाण्यकुक्षौ पातयितुमिच्छतीति कियदिदं साहसं मध्यस्थस्येति विभावयन्तु विपश्चितः?। तथाहि—"दृष्टाः खल्वस्माभिः काश्चन मुद्रिताः पुस्तिकाः यास्वाचार्यश्रीसागरानन्दसूरीणां अभिप्रेतेन प्रकारेणोमास्वातिवचनस्य व्याख्याः कृता दृश्यन्ते, किन्तु आचार्यश्रीसागरानन्दसूरिभिः स्वमतसिद्धये ता अनुपन्यस्यद्भिः समीचीनमेवानुष्ठितमित्यभिप्रेयतेऽस्माभिः। उपरिनिर्दिष्टमतपत्रकमिव तासामपि प्रामाण्यविषये संशीतिरेव नश्चेतसि" इति पूर्वं मध्यस्थो वदति। अनन्तरं च "स्वाभिमतसिद्धये यानि शास्त्राणि समुपन्यस्तानि तानि च शास्त्राभासान्येवे"ति वदति। एतेनेदमवगम्यते—"क्षये पूर्वा तिथिः कार्या, वृद्धौ कार्या तथोत्तरा" इत्युमास्वातिवचःप्रघोषत्वेन प्रसिद्धस्यास्य वचनस्याचार्यश्रीसागरा-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

नन्दसूरिसम्मतार्थोपष्टम्भकानि सन्ति बहूनि प्रमाणानि यदव-लम्बेनैव श्रीसागरानन्दसूरिभिः वचनस्यास्यैतादृशोऽर्थो क्रियते, न स्वबुद्धिबलमात्रमवलम्ब्य । तेषु च कानिचित् तैर्मध्यस्थाय न प्रदर्शितानि । परं मध्यस्थेन स्वयमेव दृष्टानि । कानिचित्तैः प्रद-र्शितानि । तान्यप्यप्रमाणान्येवेति सुदृढो मध्यस्थस्य विश्वास इति । एवं वदता मध्यस्थेन स्वाभिप्रायपोषकाणां लब्धप्रामाण्य-पदवीकस्य कस्यापि ग्रन्थस्याप्रदर्शनेन प्रायस्सर्वेऽपि जैनसम्प्रदा-यीया वाङ्मया अप्रामाण्यकूपे पातिता न वेति जैनसङ्घा एवोन्मी-लितलोचना विवेचयन्तु ॥

किञ्च आचार्यश्रीसागरानन्दसूरिभिः "क्षये पूर्वा तिथिः कार्या" इत्यस्य पर्वतिथिमात्रविषयकत्वं यदुपवर्णितं तत्खण्डनाय प्रवृत्तो मध्यस्थः षष्ठविवादपदमध्ये एवं कथयति–"प्रकरणाच्चेदयं प्रविभा-गः पर्वतिथीनां प्राप्नोतीति चेदाचार्यश्रीसागरानन्दसूरयो मन्यन्ते तदा प्रकरणं नामातीव दुर्बलं प्रमाणं वाक्यार्थनिर्णय इति ब्रूमः" इति । तत् कियदज्ञानमूलकमिति अपलापो वा वस्तुस्थितेरिति विभावनीयम् । यतो "वाक्यात्प्रकरणाल्लिङ्गादौचित्यादर्थनिर्णयः" इत्यर्थनिर्णये प्रकरणस्यापि कारणत्वमुद्घोषयन्ति वाक्यार्थको-विदाः । सैन्धवमानय इत्यादौ विना प्रकरणं कथं वाऽर्थस्य निर्ण-यश्शक्यते कर्तुम् ?, नेदं प्रकरणमस्मदभिप्रेतम् । किन्तु तार्तीयी-कम् । तच्च श्रुतिलिङ्गाद्यपेक्षयाऽतिदुर्बलमिति चेत्–अहो ! मीमां-सकमूर्धन्यत्वमात्मनस्साधु प्रकटितम् । किं तत् स्वरूपत एव दुर्ब-लम् ? उत पूर्वप्रमाणसमवाये ?, यदि स्वरूपतः तर्हि कथं प्रया-जादीनां दर्शपूर्णमासाद्यङ्गत्वम् ? । 'समिधो यजति' 'आज्यभागौ यजति' इत्यादिषु हि विधिषु इष्टविशेषाश्रवणात् समिद्यागे न भावयेत् इत्येतावन्मात्रोक्तौ किं भावयेदित्युत्पन्नायामाकांक्षायां प्रकरणसमर्पितयोरेव दर्शपूर्णमासयोरुद्देश्यत्वमङ्गीकृत्य तद्वाचक-पदकल्पनया प्रधानवाक्येन वा सहैकवाक्यतादिकल्पनाद्वारा



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वाक्यार्थनिष्पादनमिति मीमांसकमर्यादा । उक्तं हि पार्थसारथि-
मिश्रैर्न्यायरत्नमालायाम्—क्वचित् प्रकरणाद्यनुमेया । यथा 'दर्शपू-
र्णमासाभ्यां स्वर्गकामो यजेत' 'समिधो यजति' इत्यनयोरस्ता-
मिवुपेता दर्शपूर्णमासभावना कर्तव्या इत्येवंरूपैकवाक्यता
कल्प्यते' इति । अथ पूर्वप्रमाणसमवाय एव दौर्बल्यमित्युच्येत
तर्हि किं तत् पूर्वं प्रमाणं मध्यस्थस्याभिप्रेतं ? यदपेक्षया तेन
प्रकरणस्य दौर्बल्यं निरूप्यते ? । यदि किञ्चिदभिप्रेतं तर्हि तत्
कुतो नोपन्यस्तम् ? । तदनुपन्यसनं तदभावं मध्यस्थस्य तद्विषय-
कमज्ञानं वा सूचयति । एवं च प्रकरणबाधकस्य कस्यापि प्रमा-
णस्याभावात् "क्षये पूर्वा तिथिः" इति सामान्यतः श्रुतस्यापि
तिथिपदस्य प्रकरणात् पर्वतिथिपरत्वमेव निश्चीयते । यथा "प्रा-
श्नन्ति ब्राह्मणा ओदनम्" इत्याधानप्रकरणे पठिते आधानाङ्ग-
भूतब्रह्मौदनप्राशनार्थं ब्राह्मणविधायके वाक्येऽविशेषश्रुतस्याऽपि
ब्राह्मणपदस्य प्रकरणादाधानाङ्गतया विहिताध्वर्य्वादि ऋत्विङ्मा-
त्रपरत्वं तद्वत् । अतश्चाचार्यश्रीसागरानन्दसूरिभिरत्र तिथिपदस्य
पर्वतिथिपरत्वं यदुक्तं तत् अतीव सङ्गतं शास्त्रानुगतं चेत्यत्र
न संदेहलवोऽपीति सिद्धम् ।

एवं चाराधनायां पर्वतिथेः परमार्थतः क्षयो वृद्धिर्वा नास्ति
इति श्रीसागरानन्दसूरीणां मतम् । तच्च तैर्यथावदुपपादितमेव ।
प्रमाणैरपि तदुपलभ्यत एव, तथाहि—"अभिवड्ढियसंवच्छरे जत्थ
अहियमासो पडति तो आसाढपुण्णिमाओ वीसतिराते गते
भण्णति—ठियामोत्ति" इति निशीथचूर्णिगतं वचनम् । अस्याऽ-
यमनुवादः—अभिवर्द्धितसंवत्सरे यत्राऽधिकमासो भवति तदा
आषाढपूर्णिमातो विंशतौ रात्रिषु गतासु भणति यत् वयं
स्थिताः स्म इति । प्राचीनजैनज्योतिर्गणितानुसारेण पञ्चवर्षात्मके
युगे युगमध्ये पौषमासस्य युगान्ते चाषाढमासस्येति द्वयोरेव
मासयोर्वृद्धिर्भवति । तत्र युगमध्ये पौषमासस्य वृद्धौ सत्यां आषा-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

इपूर्णिमायास्सत्त्वेन तदुक्तिसम्भवेऽपि आषाढमासस्य युगान्ते वृद्धौ सत्यां सूर्यप्रज्ञप्तिज्योतिष्करण्डकादिशास्त्रप्रामाण्येन अवश्यं क्षयं प्राप्तायां द्वितीयाषाढपूर्णिमायां उपादानमयुक्तमेव स्यात् । तदुपादानेन चाराधनायां तस्याः क्षयाभावः स्पष्टं प्रतीयते ।

एवं सेनप्रश्नस्य तृतीयोल्लासे—एकादशीवृद्धौ श्रीहीरविजयसूरीणां निर्वाणमहिमपौषधोपवासकृत्यं पूर्वस्यामपरस्यां वा कुत्राऽनुष्ठेयम् ? इति प्रश्नस्योत्तरतया "औदयिक्येकादश्यां श्रीहीरविजयसूरिनिर्वाणपौषधादि विधेयम्" इत्युक्तम् । अत्राप्येकादश्याः परमार्थतो वृद्धिस्वीकारे उभयत्रौदयिकीत्वसत्त्वेन औदयिक्यामेकादश्यामिति कथनमसङ्गतं स्यात् ? । तेनावगम्यते—वस्तुतः पर्वतिथेर्वृद्ध्यभावेनैकैवौदयिकी एकादशी भवति । तस्यां च शास्त्रत एकस्यामेव प्राप्तायामौदयिक्यामेकादश्यां पौषधाद्यनुष्ठेयमिति ।

## मध्यस्थस्वरूपं तत्कर्तव्यं च ॥

अथ को नाम मध्यस्थः ? किं तस्य स्वरूपं ? कथं तेन भाव्यं ? इतीदानीं किञ्चिदिव विमृश्यते—विवादास्पदयोः पक्षयोर्मध्यवर्ती नैकतरपक्षपाती क्वचिदप्यनाग्रही विचारचातुरीधुरीणः शास्त्रीयसंस्कारसुसंस्कृतमतिः प्रेक्षावान् पण्डितप्रवरश्च माध्यस्थ्ये स्थापनीयो, यो विवादास्पदीभूते विषये पक्षद्वयमपि यथावदवबुध्य निर्णयापेक्षितन्यायसञ्चारपुरस्सरं निरुपधितमेव पक्षं निर्णेतुमीष्टे, यश्च सर्वथा शास्त्रीयात् पथो न मनागपि प्रच्यवते । प्रकृतमध्यस्थं तु नियमा एते न स्तोकमपि स्पृशन्ति । निर्णयपत्रस्य तदीयस्यावलोकनेन स्पष्टमिदमवगम्यते—यन्मध्यस्थमहाशयोऽयं कस्मिंश्चित् पक्षे साग्रहं पतित एव सन् तत्पक्षस्थापनमेव मनसि निश्चित्यासौ केवलं प्रदर्शनायैव परं स्वस्य मध्यस्थत्वमभिमन्यतीति । तथाहि—अत्र मध्यस्थेन विचार्य निर्णयार्थं दश विवादपदान्युत्थापितानि । तैश्चोभयसाधारणैर्भाव्यम् । परं न तथा दृश्यते । केवलं सागरा-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

नन्दसूर्युपस्थापितान्येव शास्त्राणि । युक्तीश्च विचारपथमानीय तत्र स्वमनीषितं निर्णयमदान्मध्यस्थः । विवादपदेषु अष्टमनवमे एव मुख्ये विवादपदे। अन्यानि तु तदुपष्टम्भकानि । तत्राष्टमं विवादपदमेवमुपपादितं मध्यस्थेन–आचार्यश्रीसागरानन्दसूरिभिरुमास्वातिवचःप्रघोषत्वेन प्रसिद्धस्य "क्षये पूर्वा तिथिः कार्या, वृद्धौ कार्या तथोत्तरा" इत्यस्य श्लोकार्धस्य योऽर्थोऽभिप्रेतः सन्ति वा तदर्थसाधकानि शास्त्राणि ? विद्यते वा समर्थो जीतव्यवहारः ? इति । अत्र यथा आचार्यसागरानन्दसूरिस्वीकृते पक्षे शङ्कोत्थापिता तथा पक्षान्तरेऽप्युत्थापनीया सा विवादपदतामापादनीया चासीत् । तन्नैव कृतम् । तेन स्पष्टमवगम्यते मध्यस्थस्य विचारविमर्शादेः पूर्वमेवैकपक्षकटाक्षः पक्षान्तरपतितत्वं च ।

एवं स्वाभिलषितमेव स्वमनसि विघूर्णमानं 'क्षये पूर्वा' इत्यस्यार्थविशेषं नवमविवादपदविषयतामापादयति । तदिदमशास्त्रीयम् । परपक्षद्वयनिष्ठयुक्तायुक्तत्वप्रमाणपथारूढत्वतदनारूढत्वलोकव्यवहारसिद्धत्वतदभावादिविचारपूर्वकनिर्णयप्रदानं हि मध्यस्थकार्यम् । न तु स्वाभिमतं पूर्वनिर्णीतमर्थं निर्णेतुं स्वयमेव नियोज्यते मध्यस्थः । तेन स्पष्टमिदमवगम्यते–पूर्वमेव कस्मिंश्चित् पक्षे पतित्वा तं चात्मीयं कृत्वा विशदतमेव पक्षपातिता मध्यस्थस्य ।

दशमं विवादपदमपि तदेवावद्योतयति । अन्ततो मध्यस्थस्य नैगमिको व्यापारोऽयमतितरामास्माकीनं चेतो विस्मापयति । यदयमाचार्यसागरानन्दसूरीणां मतं प्राचीनैराचार्यैर्बहुभिस्समादृतमपि नाद्रियते । तैः प्रदर्शितानि प्रमाणानि शास्त्राणि च प्रमाणाभासतामापादयति । जीतव्यवहारमपि तैः प्रदर्शितं नाङ्गीकरोति । जीतव्यवहारसिद्धये च तैरुदाहृतानि शास्त्राभासान्येवेति न जीतव्यवहारसिद्धिरिति ब्रुवन् , श्रीविजयरामचन्द्रसूरिभिस्तु स्वमतपरिपोषणाय न किमपि शास्त्रमागमो वा प्रादर्शि, केवलं स्वकल्पिताभिर्युक्तिभिरेवात्मीयाभिः तच्च स्वमतं समर्थितं ! "ते स्वाभिमतं पक्षं प्रासाध-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

यन्निति स्वसिद्धान्तप्रतिपादनं चैभिः प्रबलाभिर्युक्तिभिस्समर्थितम्। आधुनिकैर्जैनैरभ्युपगते पञ्चाङ्गे तिथ्यादिपरिवर्तनमसहमानैः श्रीसागरानन्दसूरीणां प्रतिपक्षत्वं स्वीकृतं प्रबलाभिर्युक्तिभिश्च स्वाभिमतं समर्थितम्" इति मध्यस्थलेखनादेवाऽवगम्यते। एवञ्च केवलं युक्तिबलमात्रमवलम्ब्य स्वसिद्धान्तं साधयितुं प्रवृत्तानां आचार्यश्रीविजयरामचन्द्रसूरीणां मतं पोषयितुं श्रीमदाचार्यसागरानन्दसूरिभिः आगमानुसारिस्वमतपोषणाय मध्यस्थं प्रति प्रदर्शितानि सर्वाणि प्रमाणानि मध्यस्थेनाऽप्रमाणीकृतानि शास्त्राणि च शास्त्राभासत्वमानीतानि। प्राचीनाचारश्च पृष्ठीकृतः, शास्त्रमर्यादोल्लङ्घिता समूला। प्राचीनास्तत्संप्रदायाचार्या अपि अतथाकृताः अन्ततः स्वात्मापि, इत्यादिकान् दोषपूगान् तदीयनिर्णयपत्रे निभालयमानस्य कस्य वा प्रज्ञावतो मनो न विस्मयपदमारोहेत्?।

इतरेष्वपि विवादपदेषु केषाञ्चिदुत्थितिरेव न घटते, केषाञ्चित्परस्परं विरोधः, केषुचिदेकेनेतरस्य गतार्थता, केषुचित्स्वोक्तिविरोध इत्यादयो दोषास्साधु समुद्घाटिताः पण्डितप्रवरेण श्रीतुलाकृष्णझामहोदयेन स्वकीये आगमानुसारिमतव्यवस्थापनाख्ये ग्रन्थे ते तत एवाऽवगन्तव्याः। न पुनस्तेषामिहाऽपि पुनरुक्तिरपेक्ष्यते।

## निष्कृष्टांशः।

एतावता प्रबन्धेन जैनागमानां यथावदनुशीलनेन प्राचीनतदाचारपरिशीलनेन मीमांसारीतिमनुसृत्य विचारकरणेन प्राचीनाचार्यसम्मत्यनुसारेण जीतव्यवहारानुरोधेन जैनसङ्घीयमतपर्यालोचनया चाऽधो निर्दिष्ट एव राद्धान्तो निर्विशयं निर्गलति–

(१) "क्षये पूर्वा तिथिः कार्या" इत्यस्य वचनस्य वैदिकसंप्रदायानुसारिषु केषुचिद्धर्मशास्त्रग्रन्थेषु दर्शनेऽपि श्रीमदाचार्योमास्वातिभिः स्वीयतपःप्रभृत्यनुष्ठानाय जैनसङ्घापेक्षिताराधनाङ्गभूतपर्वतिथिविषयविवेचनाय तत्समानानुपूर्वीकाया एव वचनव्यक्तेरुद्घोषणात् वचनस्याऽस्योमास्वातिवचःप्रघोषत्वेन प्रसिद्धिस्सा-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ध्व्येव सर्वथा । तस्याऽर्थस्तु लौकिकटिप्पणे यदि कस्याश्चिदष्टमी-चतुर्दश्यादेः पर्वतिथेः क्षयो दृश्यते तदा आराधनार्थं पर्वतिथेः क्षयासम्भवात् तस्या औदयिकीत्वावश्यंभावाच्च शास्त्रेणाऽनेन पूर्वापर्वतिथिगतमौदयिकीत्वं क्षीणत्वेनोदयास्पर्शित्वेन टिप्पणे निर्दिष्टायां पर्वतिथौ विधीयते। तेन चाष्टम्यामौदयिकीत्वं विधिना बोध्यते । औदयिकीत्वाच्चाऽऽराधनानुष्ठानं तस्याम् । एवञ्चाऽष्टम्या औदयिकीत्वे बोधिते सप्तम्या अपर्वतिथेस्तदभावरूपः क्षयो भवतीति सा क्षीणेत्युच्यते । न तु सप्तम्यामष्टमीत्वं विधीयते मध्यस्थोक्तरीत्या । तस्याशक्यविधानत्वात्, शास्त्राननुगतत्वाच्च । कदाऽपि शास्त्रस्याऽशक्यार्थविधाने तात्पर्याभावात् ।

(२) एवं "वृद्धौ कार्या तथोत्तरा" इत्यंशस्याऽपि लौकिकटिप्पणे कस्याश्चित्पर्वतिथेर्वृद्धौ दृष्टायां तस्या दिनद्वयेऽप्युदयव्याप्तित्वेन पूर्वस्मिन्परत्र वा दिने विकल्पेनाऽऽराधनानुष्ठाने प्राप्ते पूर्वस्या औदयिकीत्वं परिसंख्यायते । पूर्वस्याः परस्या वाऽनियमेन पर्वतिथित्वे प्राप्ते पूर्वस्याः तत्प्राप्तिदशायां परस्या अप्राप्तो यस्तदंशस्तत्पूरणरूपो नियमो वा क्रियते । एवञ्च परस्या औदयिकीत्वे प्राप्ते पूर्वस्यास्तदभावेन तत्पूर्वस्या एव परमार्थतो वृद्धिस्सिद्धा । यथा अष्टम्यादेर्वृद्धौ लौकिकटिप्पणे दृष्टायां तत्र द्वितीयस्या अष्टम्या एवौदयिकीत्वबोधनात् पूर्वस्या अष्टम्यास्तदभावेन तत्पूर्वतन्याः सप्तम्या एव वृद्धिर्मन्तव्येति अयमेवार्थस्साधीयान् ।

(३) एवं पर्वानन्तरपर्वतिथिस्थले पूर्णिमायाममावायां वा क्षीणायां तस्याः नियताराध्यत्वेन क्षयासम्भवात् तत्पूर्वतन्यां चतुर्दश्यां तस्या औदयिकीत्वं संपाद्याऽऽराधनं कार्यं स्यात्, परं चतुर्दश्या अपि पर्वतिथित्वेन तस्या अपि क्षयासम्भवात्तत्पूर्वस्यास्त्रयोदश्या एव क्षयं कृत्वा तत्रैव चतुर्दश्याराधनं कार्यम् । न तु मध्यस्थोक्तरीत्या एकस्यामेव चतुर्दश्यामाराधनद्वयं कार्यम् । "नैकः श्राद्धद्वयं कुर्यात्; समानेऽहनि कर्हिचित्" इति वैदिकसम्प्रदायस्य-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मानव्यायत्वेनैकस्मिन्नाराधनद्वयस्याऽननुष्ठेयत्वेन तादृश्या मध्य-स्थोक्तेः स्वकपोलकल्पितत्वात् ।

(४) एवं तत्रैव तयोर्वृद्धौ उत्तरस्यां पूर्णिमायाममायां वा पूर्णिमादिनिमित्तकमाराधनं, पूर्वस्यां च तस्यां चतुर्दशीनिमित्तकमा-ऽऽराधनं कार्यम् । तथा च त्रयोदश्या एव तत्त्वतो वृद्धिर्भवति ।

(५) एवं भाद्रपदशुक्लपञ्चम्याः कालकाचार्येण केनाऽपि निमि-त्तेन विशेषपर्वतिथित्वनिवारणेऽपि सामान्यपर्वतिथित्वसत्त्वात् तस्या अपि क्षयासम्भवात्तदाराधनं चतुर्थ्यां स्यात् परं तस्या अपि पर्वतिथित्वेन क्षयासम्भवात्तदाराधनं शास्त्रतः क्षीणत्वमापादितायां तृतीयायामेव कार्यम् । एवमेव तत्र वृद्धिविषयेऽप्यवगन्तव्यम् । तस्मात्पर्वानन्तरपर्वतिथिषु टिप्पण्यनुसारेण क्षये वृद्धौ वा जातायां परमार्थतः पूर्वतरस्या अपर्वतिथेरेव क्षयवृद्धी कार्ये । न तु पर्वतिथेरित्येवार्थस्साधीयान् ।

(६) कल्याणकतिथिविषये तु पर्वतिथीनामपि क्षयवृद्ध्योः प्रस-क्तयोर्नाऽस्य शास्त्रस्य प्रवृत्तिः । किन्तु प्रचुरव्यवहारानुसारण-मेव तत्र शरणम् ।

(७) विजयदेवसूरिसंमतसामाचार्या अनेकैर्महापुरुषैराचरित-त्वात् एतद्विवादोत्थानात्पूर्वं विवादकर्तृभिरप्याचरितत्वात् शास्त्रा-नुगतत्वाच्च जीतव्यवहारसिद्धत्वं निर्विवादमेव ।

(८) लौकिकटिप्पणस्य पञ्चाङ्गस्य वा लौकिकविषयमात्रे प्रामाण्यं भवितुमर्हति, न लोकोत्तरविषये । तस्याऽदृष्टरूपत्वेन शास्त्रस्यैव तत्र प्रामाण्यौचित्यात् , अतश्च टिप्पणशास्त्रयोः परस्परं विरोधे शास्त्रस्यैव प्राबल्यात् तस्य प्रामाण्यमभ्युपगम्य तदर्थ एवानुष्ठेयः । न टिप्पणप्रतिपादितोऽर्थः । अतो लोकोत्तरविषये न पञ्चाङ्गमा-त्रस्य प्रामाण्यम् ।

(९) श्रीमदाचार्यविजयदेवसूरीणां तत्संमतसामाचार्या जीतव्य-वहारत्वसिद्धये ये च प्रकारोंऽशा अपेक्षिताः (१) युगप्रधानसह-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

शाचार्यप्रवर्तकत्वम् (२) किमपि विशिष्टं प्रयोजनमुद्दिश्य प्रवर्तनम् (३) प्रवर्तितस्य धर्मस्य शास्त्रैस्सहाऽविरोधः (४) संविग्नगीतार्थैरप्रतिषेधित्वं बहुभिरनुमतत्वञ्चेति ते सर्वे तत्र सन्तीत्यत्र न विवादलेशोऽपि ।

(१०) रामचन्द्रसूरिपरिगृहीतस्याऽर्थस्य असंस्कृतयोधपुरीयचण्डांशुचण्डुपञ्चाङ्गस्य वाऽऽधुनिकैरेव कैश्चिज्जैनसङ्घैः परिगृहीतत्वस्य मध्यस्थेनैवोक्तत्वात् प्राचीनाचार्यापरिग्रहाच्च तस्य जीतव्यवहारसिद्धत्वं अंशतोऽपि नास्ति । त्रिपुरुषाधिकमहापुरुषपरंपरानुष्ठितत्वस्यैव जीतव्यवहारत्वसाधकत्वात् ।

(११) श्रीमदाचार्यसागरानन्दसूरीणामभिप्रेतं मतमागमानुसार्यपि प्राचीनाचार्यादृतमपि जीतव्यवहारसिद्धमपि शास्त्रीयमार्गानुसार्यपि अनभ्युपगच्छन्स्वमतपोषणाय तैः प्रदर्शितानां शास्त्राणामप्यप्रामाण्यं आभासत्वं वाऽऽपादयन् केवलयुक्तिमात्रावलम्बिनं प्राचीनाचार्यानादृतमपि शास्त्राननुगृहीतमपि श्रीआचार्यरामचन्द्रसूरिपक्षं परिपोषयन् तत्पक्षपातितामेवाऽऽत्मनो मध्यस्थः प्रकटयति ।

(१२) पक्षप्रतिपक्षयोर्विचार्यतयाऽवकाशमभजतामेव विषयाणां विवादपदविषयतामापादयन् स्वमनीषितमात्रमर्थं विवादपदकोटावन्तर्भावयन् क्वचित्पूर्वापरविरुद्धं च कथयन् मध्यस्थः स्वस्य तदनर्हतामेवाऽऽवेदयति । एते चाऽन्ये च बहवो दोषाः मध्यस्थे, तत्कृतनिर्णयपत्रे च साधु समुद्घाटिताः पण्डितप्रवरैः शास्त्रमर्मज्ञैः श्रीतुलाकृष्णझामहोदयैः स्वकृते आगमानुसारिमतस्थापनाख्ये निबन्ध इति ते तत एवाऽवगन्तव्याः ।

अतश्च "क्षये पूर्वा तिथिः कार्या, वृद्धौ कार्या तथोत्तरा" इत्युमास्वातिवचःप्रघोषत्वेन प्रसिद्धस्य श्लोकार्धस्य योऽर्थः श्रीमदाचार्यसागरानन्दसूरिभिरुपवर्णितः स एवाऽऽगमानुसारी प्रमाणो-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

पबृंहितः जीतव्यवहारसिद्धः परम्पराद्दतः बहुतरजैनाचार्यानुमत-साधुतरस्सर्वैर्जैनसङ्घैस्सादरं ग्रहणमर्हतीति सुदृढं वयं मन्यामहे॥ किञ्चिन्निवेदयामहे च—सानन्दमिदं—यत् भूतभावनस्य करुणा-मूर्तेर्भगवतः श्रीविश्वनाथस्य परमया कृपया परिपूर्तिमगादिदं व्यवस्थापत्रमिति। सर्वोऽपि जनो विशेषतः प्रेक्षावानभिवाञ्छति इह लोके प्राप्य मानुषं जन्म तत्साध्यमनुत्तममनितरसाधा-रणमैहिकं फलमनुभवेयं यावज्जीवं प्रेत्य च लोकान्तरेऽपि निरवच्छिन्नसुखानुभवैकभाजनं प्रभूय अन्तेऽपुनरावृत्तिलक्षणे मोक्षे आत्मानं पर्यवस्थापयेयमिति। सत्यपि च दार्शनिकेषु मोक्षस्वरूपविषये वैमत्ये तदस्तितायां न कोऽपि विवदते विना चार्वाकमेकम्। सति चैवं तादृशफलाभीप्सवः तत्साधनानुष्ठाने प्रयतमानाः दर्शनपथातीते तस्मिन् स्वमतिविभवमात्रेण किञ्चि-दपि निर्णेतुमशक्नुवानाः तन्निर्णयाय अलौकिकं किञ्चिदाम्ना-यादिकमपेक्षन्ते तदा तैस्तैराचार्यवर्यैरतिगहनविषयविगाहनधु-रीणमतिविभवविलसद्वैदुष्यप्रकर्षैः स्वीयालौकिकपारमार्थिकशक्ति-महिम्ना सर्वमपि वस्तुजातमपरोक्षीकर्तुं प्रभविष्णुभिर्लोकानुग्र-हैकपरायणैः तानि तानि शास्त्राणि विनेयमतिविभवानुसारेण विरचय्य यथोचितं ग्राहितानि, यदवबुध्य जनाः स्वस्वोचितं स्वरुचितं च कञ्चन पन्थानमवलम्ब्य तदनुसारेण तद्विहितानि कर्माणि यथावदनुष्ठाय स्वाभीप्सितं फलमवाप्नुयुरिति। तत्र यं प्रति यत् प्रवृत्तं तदनुसृत्यैव प्रवर्तेत यदि तदानीमेव स तत्तादृश-फलभाग्भवेत् नान्यथा, इत्याचार्याणां समेषामयं डिण्डिमोद्घोषः।

"स्वे स्वे कर्मण्यभिरतः, संसिद्धिं लभते नरः।"

"स्वे स्वे धर्मे रता नित्यं, सिध्यन्ति कृतिनो जनाः॥"

इत्यादिप्रमाणान्यप्यमुमेवार्थमुपोद्बलयन्ति। एवं च वैदि-कसम्प्रदायस्थाः स्वाभिलषितस्य ऐहिकस्यामुष्मिकस्य वा फल-विशेषस्य सम्प्राप्तये तत्साधनधर्मकर्मप्रतिपादकानि प्रमाणान्यन्वि-



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

च्छन्ति यथा तद्वदेव जैनसम्प्रदायरता अपि स्वस्वाभिलषितमैहिकमामुष्मिकं च फलं सम्पादयितुं स्वस्वसम्प्रदायादृतान्येव प्रमाणानि सामाचारीं वाऽन्विष्यान्विष्य तत्र प्रवर्तन्त इति युक्ततरमेव। यतो ह्याचार्याणामेतादृशभक्तश्रद्धालुजनानुजिघृक्षयैव प्रवृत्तिः। तत्र च प्राचीनाचार्यप्रवर्तितानि बहूनि प्रमाणान्यवलम्ब्य तानि तानि कर्माणि जैनसङ्घैः स्वस्वाचार्योपदिष्टमार्गानतिलङ्घनेन स्वश्रेयसाय समनुष्ठितान्यासन्।

तत्र मूर्धन्यं प्रमाणमेकं "क्षये पूर्वा तिथिः कार्या, वृद्धौ कार्या तथोत्तरा" इत्युमास्वातिनाम्ना प्रसिद्धिंगतैः प्राचीनजैनाचार्यैः प्रवर्तितम्। तत्राऽपि प्रमाणान्तरेष्विवैकमत्येनैकमेवार्थमभिसन्दधद्भिस्तैस्तैराचार्यवर्यैरनुशिष्टा जैनसङ्घाः स्वानि लोकोत्तराणि कर्माणि कुर्वन्त आसते स्म। परन्तु कस्माच्चनाल्पीयसः कालादारभ्य प्रसिद्धया द्वयोर्जैनाचार्यवर्ययोः श्रीसागरानन्दसूरिश्रीविजयरामचन्द्रसूरिमहोदययोः पूर्वोदाहृतवचनार्थनिर्णये समजनि मतभेदः। जाते च तस्मिन् तत्तच्छिष्याः स्वस्वाचार्यग्राहितानर्थान् स्वीकुर्वन्तः, तदनुसारेणैवाराधनादिकं कर्मान्वतिष्ठन्। तेनानुष्ठानद्वैविध्येसमुत्पन्ने तन्मूलकं जैनसङ्घेषु परस्परं वैमत्यमपि प्रादुर्भवितुमारेभे। तच्च सङ्घहानिकरं मन्वानाः सङ्घहितैषिणः सङ्घान्तर्गता एव केचिन्महोदयाः उभयोरप्याचार्यवर्ययोर्मतैक्यं सम्पादयितुं प्रायतन्त। परं यदा ते तत् दुश्शकमपश्यन् तयोर्द्वयोराचार्ययोर्मतं गृहीत्वा तत्र युक्तायुक्तत्वविचारपूर्वकशास्त्रीयनिर्णयकरणाय मध्यस्थं कञ्चन न्ययोजयन्। तेन च मध्यस्थेन कृते निर्णयेऽपरिपूर्णतां बहून् दोषान् पूर्वापरविरोधैकपक्षपातित्वादिरूपान् यदाऽपश्यन् तदा तन्निर्णये समुत्पन्नाऽप्रामाण्यशङ्कास्ते तन्निर्णयपत्रं यथावद्विचार्य समुचितं शास्त्रीयं च निर्णयं दातुमस्मत्समीपं तदुपानयन्। अस्माभिश्च जैनागमान् प्राचीनतदीयाचार्यसम्मतिं जीतव्यवहारं च यथावत्परिशील्य मीमांसाशास्त्रानुसृतया पद्धत्या सुविमृश्य

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

निर्णयः कश्चित्प्रदीयते । विश्वसिमो वयम् शास्त्रीयसंस्कारसंस्कृतमतिवैभवा विद्वत्तल्लजा निर्णयमिममवलोक्य परितुष्येयुः । गुणैकपक्षपातिनो विद्वन्मणय उभयेऽप्याचार्या मुदितान्तरङ्गा भवेयुः, जैनसङ्घाश्च व्यवस्थामिमां यथावदवबुध्य वीतशङ्काः स्वस्वानुष्ठेयं तपःप्रभृतिकं कर्मानुष्ठाय, स्वाभिलषितं फलमैहिकमामुष्मिकं वा संप्राप्य कृतकृत्या भवेयुरिति ॥

(१) चिन्नस्वामिशास्त्री महामहोपाध्यायः, शास्त्ररत्नाकरादिबिरुदान्वितः, अध्यक्षो हिन्दुविश्वविद्यालयधर्मविज्ञानविभागस्य । पण्डितसार्वभौमो, मीमांसाकेसरी, वेदविशारदश्च, माघ कृष्णैकादशी. वै. सं० २००२, काशी २९-१-४६.

(२) महामहोपाध्यायः हरिहरकृपालु द्विवेदी तर्कालङ्कारविद्यारत्नाकरविद्यानिधिप्रधानाचार्यपण्डितविभूषणमहामहाध्यापकविद्यासागरप्रभृतिभिरूपाधिभिर्विभूषितः ।

(३) श्वेताम्बरजैनसम्प्रदायानुसारेण पर्वतिथिविचारनिर्णयोऽयं यथा श्रीमन्महामहोपाध्याय पं. श्रीचिन्नस्वामिशास्त्रिपादैर्महामहोपाध्यायपं. श्रीहरिहरकृपालुशर्मप्रभृतिश्च प्रदत्तः, स च प्राचीनजैनाचार्यसम्मतो जीतव्यवहारानुगुणो मीमांसापद्धत्या सुविमृष्ट इति तस्यैव श्वेताम्बरजैनसम्प्रदायानुयायिनामैहिकामुष्मिकश्रेयःसम्पादकत्वे निःसंशया वयं तमेवोपादेयं मन्महे । नारायणशास्त्री खिस्ते महामहोपाध्यायः साहित्याचार्यः, साहित्यवारिधिः, साहित्यवाचस्पतिः, काशिकराजकीयसंस्कृतमहाविद्यालयप्रधानाध्यापकः, सरस्वतीभवनाध्यक्षश्च । घासीटोला, बनारससिटी. ता. ७-३-४६

(४) श्वेताम्बरजैनसम्प्रदायानुसारेण पर्वतिथिवृद्धिक्षयविषये प्राचीनार्वाचीनपक्षद्वयं सम्यगुपपाद्य पूर्वापरपर्यालोचनाभि-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मीमांसापद्धत्यनुमोदिताभिः शास्त्रयुक्तिभिः सम्यगालोच्य यन्महामहोपाध्यायपण्डितवरचिन्नस्वामिवर्य्यैर्व्यवस्थापितं तत्सर्वं पठित्वा मत्वा च प्राचीनाचार्यानुमोदितः पर्वतिथिवृद्धिक्षयाभावरूपो जीतव्यवहारः सर्वथा समीचीनो युक्तियुक्तश्चेति प्रतिभाति । अस्यैव व्यवहारस्यानुकरणं श्रेयस्करमितिवदति । **श्रीउमेशमिश्रः महामहोपाध्यायः** एम्-ए-डी-लिट्-प्रयागविश्वविद्यालयाध्यापकः। ता. १०-३-४६

(५) महामहोपाध्यायेति बिरुदेन विभूषिताः । नानाशास्त्रसुनिष्णाता मीमांसारत्नभास्कराः ॥ सिद्धान्तस्थापनादक्षाः श्रीचिन्नस्वामिशास्त्रिणः । धर्मशास्त्रं समालोच्य मीमांसाशास्त्रयुक्तिभिः ॥ तिथिवृद्धिक्षयौ सूक्ष्मं प्रविचार्य्य मनीषया । अनवद्यस्वसिद्धान्तं यमत्र समुपादिशन् ॥ स जैनागमसिद्धान्ताविरुद्धः सम्प्रवर्त्तते । निष्कम्पो युक्त्यवष्टम्भः प्रमाणेनोपबृंहितः ॥ जैनास्तदनुसारेण चरन्तः कृत्यपद्धतिम् । अवियुक्ताः स्वधर्मेण भवेयुरिति नो मतम् ॥ इति **महामहोपाध्यायश्रीकालीपदतर्काचार्य्यशर्मणाम्** कलिकाताराजकीयसंस्कृतमहाविद्यालयप्राच्यविभागीयप्रधानाध्यापकानाम् । २९–३–४६

(६) जैनसम्प्रदायानुसारितिथिवृद्धिक्षयविषयकं व्यवस्थापत्रमिदं सम्यगवलोकितं मया । तत्र सर्वे विषयाः प्राचीनजैनाचार्यानुमोदिताः मीमांसाशास्त्रपद्धत्या साधु परिशीलिताः शास्त्रीयसंप्रदायानुगताः सत्तर्कोपबृंहिताः सहृदयहृदयंगमाश्च परिदृश्यन्ते । अतः प्राचीनसदाचारानुष्ठानश्रद्धालुभिरार्हतसमयानुसारिभिः सर्वैस्समादरणीयमिदं व्यवस्थापत्रमिति सुदृढं विश्वसिमि । अपि च, व्यवस्थापत्रमिदं आचारशास्त्रार्थव्यवस्थापनापेक्षितानभिष्वंगादिगुणभावितमिति सुधियः स्वत एव विदांकुर्युः । इति–श्रीरामनर-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सिंहाचार्यः महामहोपाध्यायः, विद्यारत्नाकरः, श्रीवेङ्कटेश्वरप्राच्यविद्याविभागास्थानविद्वान् । ता. १–३–४६

(७) जैनमतसंप्रदायनिर्णायकतन्मतीयप्राचीनाचार्यैः प्रणीतधर्मशास्त्रानुसारिव्यवस्थापत्रं समवलोक्य इयं व्यवस्थातत्संप्रदायसंमतेति निश्चिनुमः । महामहोपाध्यायश्रीसेतुमाधवाचार्यः, विद्यामार्तंडाद्युपाधिभूषितः श्रीपट्टपुरविराजमानश्रीवेंकटेश्वरसंस्कृतमहाकालाशालापद्मसरोवर(निरिच्चानूर)क्षेत्रविराजमानद्वैतवेदान्तकलाशालयोरध्यक्षपदेन विभूषितचरः, माघ वदि ११–२००२. २७-२-४६.

(८) जैनाचार्ययोः श्रीसागरानन्दसूरिश्रीविजयरामचन्द्रसूरिमहाशययोः पक्षप्रतिपक्षलेखौ तत्र मध्यस्थनिर्णयश्चेति सर्वमिदमालोचयितुं मया यद्यपि समयो नासादितः, अथापि मीमांसकप्रवरमहामहोपाध्यायश्रीचिन्नस्वामिमहोदयव्यवस्थायां शास्त्रीयां पद्धतिमवलम्ब्य पक्षप्रतिपक्षयोर्मध्यस्थनिर्णयस्य च विचारः कृतः । जैनागमाश्चापि महाभागैरेतैः सम्यगालोचिता विवेचिताश्च । एतैश्च प्रमाणानि जैनसदाचारादिकं च साक्षीकृत्य श्रीसागरानन्दसूरिमहोदयस्य पक्षः समर्थित इति मयाप्येतदनुमोद्यते ।–गिरिधरशर्मा चतुर्वेदः (महामहोपाध्यायः) जयपुरस्थः) (जयपुरीयमहाराजसंस्कृतकॉलेजस्य भूतपूर्वोऽध्यक्षः) (मूलचन्द्रसैरातीराम-सनातनधर्म–संस्कृतविद्यापीठस्याध्यक्षः) चैत्र शु. ९ सं. २००३ शिकारपुरनगरे.

(९) मयाप्येतदुपरिलिखितं सर्वं सहर्षमनुमोद्यते ।–परमेश्वरानन्दः (महामहोपाध्यायः) लवपुरस्य सनातनधर्मकॉलेजाध्यक्षः । १०–४–४६

(१०) तिथिक्षयवृद्धिविवेकमधिकृत्य जैनाचारविवादे जैनागमजीताचारानुमोदितं वस्त्वेव पर्वतिथिक्षयवृद्ध्यभावरूपं तन्म-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तरीत्या साध्विति सम्मन्यते—श्रीमन्माध्वसम्प्रदायाचार्य्य-दार्शनिकसार्वभौमसाहित्यदर्शनाद्याचार्यन्यायरत्नतर्करत्न-गोस्वामि–दामोदरशास्त्री । फा. सु. ८–२००२ काशी

(११) पण्डितराजशास्त्ररत्नाकरसर्वतन्त्रस्वतन्त्रश्रीराजेश्वर-शास्त्री द्राविड साङ्गवेदविद्यालय प्रिन्सिपल ।

(१२) अत्र जीतव्यवहारानुकूलं प्राचीनमतमेव युक्तमित्य-स्माकं मतं गीर्वाणवाग्वर्धिनी सभासदाम् । इति तथा च पर्वतिथीनां परमार्थतो वृद्धिक्षयौ न भवतः इति सागरान-न्दसूरिमतमेव युक्तमिति पर्यवसन्नं मतं प्रमाणयामः ।–अध्यापकरत्नं, न्यायाचार्यः हरिरामशास्त्री शुकलः (मन्त्री) साङ्गवेदविद्यालयाध्यापकः ।

(१३) व्याकरणाचार्य–व्याकरणवाचस्पति श्रीदेवनायका-चार्यः (सभाध्यक्षः)

(१४) साङ्गवेदविद्यालयज्योतिषाध्यापकः नीलकण्ठज्योतिर्विद्

(१५) साहित्याध्यापकः साहित्यतीर्थः गोपीनाथशास्त्री मण्डे-लीकर

(१६) पूर्वमीमांसाचार्यः वेदान्तशास्त्री रामचन्द्रशास्त्री खनङ्गः उपाध्यक्षः गोयनकासंस्कृत कॉलेज । ८-३-४६

(१७) अथाऽस्मिन्पर्वतिथिविचारे सर्वसम्प्रदायानुसारिभिः पर्व-तिथेरवश्यानुष्ठेयतया तस्याश्च शुद्धानन्तरभेदेन द्विविध-तया मध्याह्लादिव्यापित्वविशेषाभावे सामान्यतयौदयिकत्व-प्राप्तावन्यत्रविवादाभावेऽपि क्षयवृद्धिस्थलेप्यौदयिकत्वव्य-वस्थापनयाऽवश्यानुष्ठेयत्वे क्षयपूर्वतिथेरौदयिकपर्वतिथित्व-विधायकतया वृद्धौ परतिथेस्तथात्वनियामकतया च शास्त्र-मिदं प्रवर्तते "क्षये पूर्वा तिथिः कार्य्या, वृद्धौ कार्य्या तथो-त्तरे"ति । तदिदं शास्त्रं वृद्धिक्षये पर्वतिथौ परपूर्वतिथ्यो-रुत्कर्षापकर्षौ बोधयत्पूर्वतिथावेव वृद्धिक्षयौ बोधयति ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तदेवं स्थितेऽष्टम्यादिपर्वतिथेः शुद्धायाः पञ्चमीपूर्णिमा-ऽमावास्यादि पूर्वानन्तरपर्वरूपाया अनन्तराया वृद्धिक्षये परपूर्वतिथ्योरनुष्ठानसिद्धौ पर्वविधिशास्त्रस्य प्रामाण्यं सिध्यति तदेवं स्थिते एतत्पर्य्यवसितानुकूलं श्रीतुलाकृष्णाशास्त्रिव्यवस्थासम्वादि म० म० श्रीचिन्नस्वामिशास्त्रिकृतं व्यवस्थापनं सर्वैरपि जैनसम्प्रदायानुसरिद्भिः प्रमाणतया ग्राह्यं तदितरदप्रमाणतया हेयमिति परामृशति । पं. श्रीबालबोधमिश्रः, प्रधानाध्यापकः, वेदान्ताचार्यः गवर्नमेण्ट संस्कृतकॉलेज, काशी ता. ५–३–४६

(१८) महामहोपाध्याय श्रीचिन्नस्वामिशास्त्रिवर्यैः सम्पादितमिदं व्यवस्थापत्रं पर्वतिथिवृद्धिक्षयविषयकम् ज्योतिश्शास्त्रप्रमाणितमिति सहर्षं सम्मनुते । पं. बलदेवमिश्रः, ज्योतिषाचार्यः, गवर्नमेण्ट सरस्वतीभवनरीसर्चकार्यसम्पादकः, काशी ता. १०–३–४६

(१९) महामहोपाध्यायचिन्नस्वामिशास्त्रिवर्यप्रदत्तमनेकैर्विद्वद्भिरनुमोदितमिदं पर्वतिथिवृद्धिक्षयविषयकव्यवस्थापत्रं ज्योतिर्धर्मशास्त्रप्रमाणितमिति समर्थयति श्रीअनूपमिश्रः, ज्योतिषाचार्यतीर्थः भूतपूर्वपुरातत्त्वान्वेषकः ज्योतिश्शास्त्रप्रधानाध्यापकः, गवर्नमेण्टसंस्कृतकॉलेज, काशी, ९-३-४६

(२०) श्रीचिन्नस्वामिशास्त्री सुविमलविलसत्सर्वशास्त्रीयदृष्टिर्मीमांसान्यायतत्या सुकृतिचयकृते यां व्यवस्थामकार्षीत् । दृष्ट्वा तामद्य हृष्टा "कथमपि कलहो, न क्षये पर्वतिथ्यामिथ्याव्याख्यातृभिः स्यादि"ति दृढमनसा जैनसङ्घं ब्रवीमि ॥१॥ इति फा० शु० सप्तमी रवौ ता. १०-३-४६ श्रीभूपनारायणशास्त्री(झोपाख्यः) व्याकरणन्यायमीमांसासांख्ययोगवेदान्ताचार्यः साहित्यरत्नश्च काशिकराजकीयसंस्कृत (गवर्नमेण्टसं०) महाविद्यालयाध्यापकः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

(२१) श्रीपण्डितवरमहामहोपाध्यायैश्चिन्नस्वामिमहोदयैः श्वेताम्बरधर्मशास्त्रीयग्रन्थं जीतव्यवहारादिञ्च दृष्ट्वा तिथिवृद्ध्यादिविषये निर्णीतं शास्त्रीयतत्त्वमनुमन्यते सहर्षम् । ता. २-४-४६ **अनन्तशास्त्री फडके** व्याकरणाचार्यः, मीमांसातीर्थः, वेदान्तवाचस्पतिः, धर्मशास्त्राध्यापकः गवर्नमेण्टसंस्कृतकॉलेज, काशी.

(२२) जैनपर्वतिथिक्षयवृद्धिविषयको महामहोपाध्यायचिन्नस्वामिशास्त्रिकृतः "क्षये पूर्वतिथ्युदितसूर्यदिने तत्कर्माचरणीयं, वृद्धौ उत्तरदिने, एवं तत्कर्मसङ्कल्पेऽपि तादृशतिथेरुल्लेखो यत् तिथिप्रयुक्तं जैनधर्मभिर्धार्मिककार्यमनुष्ठेयमि"ति निर्णयोऽनुमन्यते **नेनेगोपालशास्त्रिणा** । प्रोफेसर, गवर्नमेण्टसंस्कृतकॉलेज, बनारस.

(२३) श्वेतपटाम्बरजैनसम्प्रदायानुसारेण पर्वतिथिविचारनिर्णयं श्रीचिन्नस्वामिमहामहोपाध्यायप्रभृतिभिर्दत्तं दृष्ट्वा नितान्तमान्तरं मे प्रसीदति। यतः शास्त्रीयनिर्णयानुकूलेयं विचारव्यवस्थाशास्त्रप्रमाणमनुसरद्भिः सहृदयैरुपादेयेति सर्वथा तत्संप्रदायपरायणैःशास्त्रमर्यादासंरिरक्षुभिर्जैनवरैरनुसरणीया मान्येति बहुशः प्रमाणयति—**कमलाकान्तमिश्रः**, प्रिन्सिपल, गोयनकासंस्कृतमहाविद्यालय, ललिताघाट, काशी.

(२४) श्वे० जैनपर्वदिनं काशीस्थपण्डितप्रवरैः महामहोपाध्यायचिन्नस्वामिभिर्यत् निर्णीतं तदतीव जैनागमजीतव्यवहारानुकूलमिति प्रमाणयति । **वामाचरणमहाचार्यः**, तर्कतीर्थन्यायाचार्यः, गोयनकासंस्कृतमहाविद्यालयन्यायप्रधानाध्यापकः । ता. ७-३-४६

(२५) जैनपर्वतिथिक्षयवृद्धिविचारे जीतव्यवहारानुकूलं सागरानन्दसूरिमतमेव युक्तमिति प्रमाणयति । **देवरभट्टशर्मा**

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

न्यायाचार्यः, वेदान्तकेसरी, न्यायसांख्ययोगाध्यापकः, गोयनका संस्कृतमहाविद्यालय, ललिताघाट, काशी.

(२६) म० म० श्रीचिन्नस्वामिशास्त्रिमहाभागैः सपरिश्रमं सम्पादितं काशीस्थैः विद्वद्वरेण्यैः सहर्षं समर्थितञ्चेदं जैनागमजीताचारानुगुणं व्यवस्थापत्रं प्रमाणीकरोति। मूलशंकरशास्त्री, वेदान्ताचार्यः, काशी, गोयनकामहाविद्यालयीयाच्युतपत्रप्रधानसम्पादकः। ता. ५-४-४६

(२७) अत्रार्थे सम्मतिः बालकृष्णपञ्चोलिनः। काशीस्थखेतानसंस्कृतमहाविद्यालयाध्यक्ष-(प्रिन्सिपल)स्य। ता ५-४-४६

(२८) पूर्वोक्तां व्यवस्थामेव सबहुमानमाद्रियते कालीप्रसादमिश्रः व्याकरणाचार्यः हिन्दूविश्वविद्यालयस्थप्राच्यविद्याविभागस्याध्यक्षः। ता. ८-३-४६

(२९) प्राचीनजैनाचार्यमतानुसारिपर्वतिथिवृद्धिक्षयविषयकनिर्णयकारिव्यवस्थापत्रम् महामहोपाध्यायश्रीचिन्नस्वामिसम्पादितम् जैनागमजीतव्यवहारानुसारि मीमांसापद्धतिपरिशोधितञ्चेति सर्वेणापि श्वेताम्बरमूर्त्तिपूजकजैनसंघेनानुसरणीयमिति सम्मनुते-श्रीलक्ष्मीनाथझा वेदान्ताध्यापको व्युत्पत्तिवादप्रकाशटीकाकारो भामतीप्रकाशविकासटीकाकारः काशी, हिन्दूविश्वविद्यालयवेदान्तप्रधानाध्यापकः। ता. ८-३-४६

(३०) सितवसनप्रसाधितमहनीयमूर्त्तिवरिवस्यावशीकृतमानसमरालानां सुचिरशुचिसम्प्रदायानुगतान्तरालविघटितपर्वतिथिक्षयवृद्धिधार्मिकनिर्णयं जीतव्यवहारजैनागममीमांसाप्रमाणकोटिमाटीकितं म० म० चिन्नस्वामिशास्त्रिलब्धवर्णमहोदयसंदृब्धं पश्यतां केषां मनसि द्वापरोदयो लेशतोऽपि पदमाधातुमलम्। सर्वथास्य प्रामाण्यकक्षाधिरोहणतत्परा ममाऽपि सम्मतिरिति। महादेवपाण्डेयस्य।



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

व्याकरणसाहित्याचार्यस्य वाराणसेयविश्वविद्यालयसाहित्य-विभागाध्यक्षस्य ध्वन्यालोकख्यातिवादरसगंगाधरादिविधि-सन्दर्भोपष्कर्तृनिर्मातृसंपादयितुः कवितार्किकचक्रवर्तिनः। ता. ८–३–१९४६ ई०

(३१) महामहोपाध्यायपण्डितसार्वभौमश्रीचिन्नस्वामिशास्त्रीमहोदयैः सन्दृब्धं महामहोपाध्यायैः पं० हरिहरकृपालुप्रभृतिभिर्विद्वत्प्रकाण्डैरनुमोदितं तिथिवृद्धिक्षयविषयकं व्यवस्थापत्रमिदं सर्वथा सम्मनुते–टि. वि. रामचन्द्रदीक्षितः, शास्त्ररत्नाकरः, पण्डितराजः, मद्रपुरीसंस्कृतमहाविद्यालये भूतपूर्वाध्यक्षः, काशीहिन्दूविश्वविद्यालये वेदान्तप्रधानाध्यापकः, वेदान्तविशारदः, वेदान्तालङ्कारः, वेदान्तशिरोमणिः, वेदान्तस्थापकः। ता. १०–३–४६

(३२) प्राचीनजैनाचार्यमतानुसारिपर्वतिथिवृद्धिक्षयविषयकानिर्णयकारि व्यवस्थापत्रं महामहोपाध्यायश्रीचिन्नस्वामिसम्पादितम् जैनागमजीतव्यवहारानुसारि मीमांसापद्धतिपरिशोधितञ्चेति सर्वेणापि श्वेताम्बरमूर्त्तिपूजकजैनसंघेनानुसरणीयमिति सम्मनुते–रामजीव द्विवेदी वेदाचार्यः ता. १–४–४६

(३३) अपूर्वप्रतिभासम्भावितैः, दिगन्तविश्रुतैः, देशिकप्रवरैराचार्यपादैः, महामहोपाध्यायपदवीमलंकुर्वद्भिः श्रीचिन्नस्वामिशास्त्रिभिः सन्दृब्धो निबन्धः सुतरां शास्त्रपद्धतिमनुसरन् विद्योतत इति प्रमाणयति। मधुसूदनशास्त्री साहित्याचार्यः व्यक्तिविवेक-काव्यमीमांसाचित्रमीमांसारसगङ्गाधरप्रभृतिलक्षणग्रन्थानां उत्तररामचरितादिलक्ष्यग्रन्थानां मधुसूदनीविवृतिनिर्माता प्रोफेसर हिन्दुविश्वविद्यालय, काशी

(३४) काशीस्थमहामहोपाध्याय पं० चिन्नस्वामिशास्त्रिमहो-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

दयैरनुमतमिदं व्यवस्थापत्रं जैनागमजीतव्यवहारानुमत-मीमांसाप्रणालीपरिबृंहितमिति कृत्वा सर्वैरपि जैनैरनुसरणीयमिति प्रमाणयति । धर्मराजपाण्डेयः, वेदाचार्यः । ता. ३-४-४६ ई०

(३५) महामहोपाध्यायश्रीचिन्नस्वामिशास्त्रिप्रवरैः सम्पादितमिदं व्यवस्थापत्रं ज्योतिःशास्त्रानुसारेण तिथ्यादिविचारं सम्यग् समीचीनमिति निर्णयोऽनुमन्यते । वेणिप्रसाद शुक्लः, यजुर्वेदाचार्यः, हिन्दुविश्वविद्यालय काशी, ३-४-४६ ई०

(३६) व्यवस्थापत्रमिदं साध्विति मनुते । अ० मु० रामनाथ-दीक्षितः हिन्दूविश्वविद्यालये धर्मविज्ञानविभागे यजुस्सा-मवेदाध्यापकः । ८-३-४६

(३७) श्रीमद्भिः महामहोपाध्यायैः चिन्नस्वामिशास्त्रिपादैस्सन्दृ-ब्धमिदं व्यवस्थापत्रं जैनागमजीतव्यवहारानुमतं मीमां-साप्रणालीपरिबृंहितमिति कृत्वा सर्वैरपि जैनैरनुसरणीय-मिति सम्मनुते सुब्रह्मण्यशास्त्री मीमांसावेदान्ताचार्यः हिन्दूविश्वविद्यालये मीमांसादर्शनाध्यापकः धर्मविज्ञानवि-भागस्य, न्य-द्वि-त्रिवि-काशी । ता. ८-३-४६

(३८) जीताचारानुमोदितं जैनमतानुगतं चेदं व्यवस्थापत्रं प्रमाणयति । पूर्णचन्द्राचार्य्यः, प्रिन्सिपल श्रीरामानुज-संस्कृतमहाविद्यालयस्य, काशी । ता. २-४-४६

(३९) जैनपर्वतिथिवृद्धिक्षयविषयकोऽयं महामहोपाध्यायश्रीचि-न्नस्वामिशास्त्रिसंकलितो मीमांसाधर्मशास्त्रानुसारी निर्णयः सर्वैरपि जैनमतानुयायिभिर्निःशङ्कमङ्गीकर्त्तव्य इति समर्थ-यति साहित्याचार्योपाधिकश्रीताराचरणशर्मभट्टाचार्यः। प्रिन्सिपल, काशी टीकमाणी संस्कृत कॉलेज, शरत्कुमारी संस्कृतविद्याश्रमयोः । ता. १०-३-४६

(४०) पर्वतिथिक्षयवृद्धिविषये महामहोपाध्यायश्रीचिन्नस्वामिशा-

Shree Sudharmaswami Gyanbhandar-Umara, Surat　　www.umaragyanbhandar.com

